संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)

आदर्श-प्रश्नपत्रम् *

कक्षा - दशमी (2026-27)

अवधिः - होरात्रयम् **पूर्णाङ्काः - 80**

सामान्यनिर्देशाः -

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

'क' भागः	**:**	**अपठितावबोधनम्**	**10 अङ्काः**
'ख' भागः	**:**	**रचनात्मककार्यम्**	**15 अङ्काः**
'ग' भागः	**:**	**अनुप्रयुक्तव्याकरणम्**	**25 अङ्काः**
'घ' भागः	**:**	**पठितावबोधनम्**	**30 अङ्काः**

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

'क' भागः

अपठितावबोधनम् (10 अङ्काः)

1.	अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - श्रमस्य साहसस्य च योग्यः फलितांशः प्राप्यते। यदा भवान् मनसि लक्ष्यं चिन्तयित्वा धैर्यपूर्वकं निजकार्यं करोति तदा अवश्यमेव साफल्यं प्राप्तुं शक्नोति। अतएव कथ्यते- 'साहसे एव श्रीः प्रतिष्ठिता।' जीवने लाभालाभयोः विचारं विना परिश्रमः करणीयः। साहसिनः विद्यार्थिनः सदैव कर्मयोगिनः भूत्वा सम्यक्पदम् अलङ्कुर्वन्ति। साहसिनः जनाः सर्वदा सन्मार्गम् अनुसरन्ति। एते एव जनाः राष्ट्रोन्नयने समर्थाः भवन्ति। साहसः एव विपदि अस्माकं कृते उपकारकः भवति। साहसः श्रमः च द्वयोः अपि सामाञ्जस्यम् अनिवार्यम् अस्ति। केवलं भाग्यम् अनुसृत्य यदि उपविश्यते तर्हि साफल्यम् एकः स्वप्नः इव तिष्ठति। अतः आवश्यकता अस्ति यद् देशस्य भाविनः नागरिकाः छात्राः साहसिनः कर्त्तव्यनिष्ठाश्च भवेयुः।	10

	अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)	
	(i) जीवने कयोः विचारं विना परिश्रमः करणीयः?	2×1=2
	(ii) राष्ट्रोन्नयने के जनाः समर्थाः भवन्ति?	
	(iii) साहसे का प्रतिष्ठिता?	
	आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)	
	(i) अधुना का आवश्यकता अस्ति?	2×2=4
	(ii) के सम्यक् पदम् अलङ्कुर्वन्ति?	
	(iii) श्रमस्य साहसस्य च कीदृशः फलितांशः प्राप्यते?	
	इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।	
	ई. यथानिर्देशम् उत्तरत -	1
	(i) 'एते एव जनाः राष्ट्रोन्नयने समर्थाः भवन्ति।' अत्र कर्तृपदं किम्?	3×1=3
	(क) एते (ख) जनाः	
	(ग) समर्थाः (घ) भवन्ति	
	(ii) 'साहसिनः जनाः सर्वदा सन्मार्गम् अनुसरन्ति।' अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम्?	
	(क) साहसिनः (ख) जनाः	
	(ग) सन्मार्गम् (घ) अनुसरन्ति	
	(iii) 'जनाः' इति विशेष्यपदस्य विशेषणपदं किम्?	
	(क) योग्यः (ख) उपकारकः	
	(ग) साहसिनः (घ) प्रतिष्ठिता	

'ख' भागः

रचनात्मकं कार्यम् (15 अङ्काः)

2.	**भवान् मुकेशः। संस्कृतसम्भाषणशिविरविषये स्वमित्रं प्रति लिखितं परं मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत।**	10×½=5

रोहिणी सेक्टर 9,

(i) _____

तिथिः _____

प्रिय मित्र मनोज !

सस्नेहं (ii) _____ ।

अत्र सर्वगतं कुशलम्। मन्ये भवान् अपि (iii) _____ स्यात्। गतसप्ताहे अस्माकं विद्यालये संस्कृतसम्भाषणशिबिरम् (iv) _____ आसीत्। दश दिनानि यावत् वयं संस्कृतेन सम्भाषणस्य (v) _____ कृतवन्तः। एकस्याः लघुनाटिकायाः मञ्चनं (vi) _____ अकुर्म। अहं तु विदूषकस्य (vii) _____ कृतवान्। सर्वे जनाः हसित्वा वारं वारं करतलध्वनिम् अकुर्वन्। अहं तु

	इदानीं सर्वदा संस्कृतेन एव वदामि। मम शिक्षकः अपि (viii) _____ स्निह्यति। त्वम् अपि प्रयत्नं कुरु। नूनं यशस्वी भविष्यसि। पितरौ (ix) _____ मम प्रणामाञ्जलिं निवेदयतु। तव (x) _____ , मुकेशः। **मञ्जूषा** नमस्ते, अभ्यासम्, दिल्लीतः, प्रति, कुशली, अभिनयम्, मयि, आयोजितम्, वयम्, अभिन्नहृदयः।	
3. अ	प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत -  **मञ्जूषा** सर्वोच्चन्यायालयः, मार्गदीपाः, कारयानानि, सम्मर्दः, वृक्षाः, राष्ट्रध्वजः, अधिवक्तारः, न्यायार्थम्, अभियाचना, निर्णयः, भारतदेशस्य, जनाः। **अथवा** आ मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत - **“वृक्षाणां महत्त्वम्”** प्रकृतेः शोभा, पर्यावरणस्य, रक्षकाः, यच्छन्ति, प्राणवायुम्, औषधम्, काष्ठम्, फलानि, पुष्पाणि, मेघवर्षणे, सहायकाः, छायाम्, विहगानाम्, आश्रयस्थलम्।	5×1=5

4. अ	**मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-** एकदा कोऽपि अहङ्कारी विद्वान् नागरिकः नौकया नदीपारं गच्छति स्म। सः आकाशं पश्यति, नाविकं च पृच्छति – **नागरिकः** - भो नाविक! नक्षत्रविद्यां जानासि किम् ? **नाविकः** - (i) _____। **नागरिकः** - (हसन्) भो मूर्ख! तव जीवनस्य चतुर्थांशः नष्टः। त्वं गणितं पठितवान् किम्? **नाविकः** - (ii) _____। **नागरिकः** - एवं वा? तर्हि तव जीवनस्य अर्धं व्यर्थं जातम्। (वृक्षपङ्क्तीः दृष्ट्वा) किं त्वं वृक्षविज्ञानं जानासि ? **नाविकः** - (iii) _____। **नागरिकः** - हा हन्त! तव जीवनस्य त्रिचतुर्थांशः भागः व्यर्थं गतः । **नाविकः** – (iv) _____। **नागरिकः** - भोः! एषा नौका तु दोलायते। अत्र जलमपि प्रविशति। किं करोमि? अहं तु तरणं न जानामि। **नाविकः** - (v) _____। **मञ्जूषा** (i) महोदय! अहं केवलं गणनाम् एव जानामि, न तु सम्पूर्णं गणितम्। (ii) अहं कथं वृक्षविज्ञानं जानीयाम्? अहं तु नौकां चालयित्वा स्वोदरं पूरयामि। (iii) तरणं न जानाति भवान् ? तर्हि नूनं भवतः तु सम्पूर्णमेव जीवनमेव नष्टम्। (iv) पश्यतु पश्यतु, प्रबलः वायुप्रकोपः उत्पन्नः। अहं तु जले कूर्दित्वा तरामि। (v) अहं न जानामि महोदय! परम् अहं प्रतिदिनं तारकाणि दृष्ट्वा नमामि। **अथवा**	5×1=5
आ	**मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत -** एकदा केचन शिष्याः (i) _____ कुर्वन्ति स्म। तदैव एकः गजः महता वेगेन तस्मिन् (ii) _____ आगच्छत्। गजस्य उपरि उपविष्टः (iii) _____ उच्चस्वरेण पुनः पुनः घोषयति स्म - अपसरन्तु, अपसरन्तु इति। सर्वे (iv) _____ धावितवन्तः। यथा सर्वेषु वस्तुषु (v) _____ अस्ति तथा गजे अपि अस्ति इति विचिन्त्य एकः शिष्यः तत्रैव (vi) _____। तावति काले गजः तं स्वशुण्डेन गृहीत्वा दूरे क्षिप्तवान्। शिष्याः मूर्च्छितं तं गुरुकुलम् अनयन्। (vii) _____ तं गुरुः अपृच्छत् - “वत्स! त्वम् एवं किमर्थम् अकरोः इति।" शिष्यः (viii) _____ - "गुरुवर्य! भवद्भिः एव शिक्षितम् यत् ईश्वरः सर्वेषु अस्ति, अतः अहं गजे अपि (ix) _____ मत्वा तत्र अतिष्ठम् इति।"	10×½=5

	गुरुः उक्तवान् - "वत्स! यथा गजे तथैव हस्तिपके अपि ईश्वरः इति त्वया (x) _____ न चिन्तितम् इति।" **मञ्जूषा** हस्तिपकः, लब्धसंज्ञम्, मार्गे, कथम्, अवदत्, भिक्षाटनम्, ईश्वरम्, शिष्याः, ईश्वरः, स्थितवान्।	

'ग' भागः

अनुप्रयुक्तव्याकरणम् (25 अङ्काः)

5. अ	अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (i) व्ययतः वृद्धिमायाति क्षयमायाति **सं + चयात्**। (ii) पुष्पाणां समृद्धिः **सुगन्धिः + च** मनोहरः। (iii) विद्वांस एव **लोकेऽस्मिन्** चक्षुष्मन्तः प्रकीर्तिताः। (iv) समाः द्वादश **पर्जन्यस्तत्** राष्ट्रं नाभिवर्षति।	4×1=4
	अथवा	
आ	अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (i) स्वाध्यायाभ्यसनं **चैव** वाङ्मयं तप उच्यते। (ii) **अग्निः + इव** दहति माम् अयं शोकः। (iii) **स विवेकः** इति ईरितः। (iv) **काकात् + अन्यः** को भवितुम् अर्हति।	
6.	अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (i) '**यथोचितं** क्रियताम्' इति राजादेशं श्रुत्वा सर्वे कपयः अचिन्तयन्। (क) अनतिक्रम्य यथा (ख) उचितेन सह (ग) उचितम् अनतिक्रम्य (घ) उचितस्य योग्यम् (ii) लोके **चक्षुर्दानं** दुष्करमेव। (क) चक्षुषः दानम् (ख) चक्षुसे दानम् (ग) चक्षुसा दानम् (घ) चक्षुसि दानम् (iii) प्रच्छन्नभाग्यस्य भार्या परद्रव्ये **न आसक्ता** आसीत्। (क) नासक्ता (ख) अनासक्ता (ग) सशक्ता (घ) अशक्ता (iv) ततः प्रविशतः **व्यासश्च नारदश्च**। (क) व्यासश्चनारदाः (ख) व्यासनारदाः (ग) नारदाव्यासौ (घ) व्यासनारदौ	4×1=4

7.	अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (i) 'ईटा' हि यस्यास्ति पुरी **<u>प्रधाना</u>**। (क) प्रधान + तव्यत् (ख) प्रधान + टाप् (ग) प्रधान + ङीप् (घ) प्रधान + ठक् (ii) विद्वांसः एव लोकेस्मिन् **<u>चक्षुस् + मतुप्</u>** प्रकीर्तिताः। (क) चक्षुश्मान् (ख) चक्षुष्मान् (ग) चक्षुस्मन्तः (घ) चक्षुष्मन्तः (iii) राज्ञः **<u>दानशील + तल्</u>** आकर्ण्य जनाः तत्र आगताः। (क) दानशीलताम् (ख) दानशीलता (ग) दानशीलतायै (घ) दानशीलतया (iv) अरुणाचले अनेकानि **<u>दर्शनीयानि</u>** स्थलानि सन्ति। (क) दृश् + टाप् (ख) दृश् + तल् (ग) दृश् + अनीयर् (घ) दृश् + मतुप्	4×1=4
8. अ	वाच्यानुसारं मञ्जूषायाः उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत - **राकेशः** - प्रातः काले (i) _____ किं करोति? **राघवः** – प्रातःकाले मया पाठः स्मर्यते। **राकेशः** - किं भवान् भ्रमणाय न गच्छति? **राघवः** – अहम् अस्वस्थः अस्मि, अतः (ii) _____ भ्रमणाय न गम्यते। **राकेशः** - किं भवान् नित्यं व्यायामम् अपि करोति ? **राघवः** - आम् ! मया नित्यं व्यायामः (iii) _____। मञ्जूषा क्रियते, मया, भवान्। अथवा	3×1=3
आ	वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत - (i) अहं तुभ्यं गदां शक्तिं च (दा) _____। (ii) _____ (अस्मद्) शीतले जले तिष्ठामि। (iii) अहम् _____ (आचार्य) पृच्छामि।	
9.	कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (i) वैदिकः मध्याह्ने _____ (12:30) वादने पुस्तकालयं गच्छति। (ii) पृषा रात्रौ _____ (8:45) वादनपर्यन्तं गृहपाठं लिखति। (iii) अहं प्रातः _____ (5:15) वादने धावामि।	3×1=3

10.	मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (i) मेषः _____ पश्यति तत् खादति। (ii) अग्निः _____ दहति माम् अयं शोकः। (iii) शक्रः अवदत् - 'शतयोजनपर्यन्तं शैलानां पारं च द्रष्टुं समर्थः भव _____'। (iv) केचिद् दग्धाः, केचिद् अर्धदग्धाः केचन _____ पञ्चत्वं गताः। **मञ्जूषा** इति, यत्, च, इव।	4×1=4
11.	अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - (i) मनः **दुर्निग्रहः** चलं भवति। (क) दुर्निग्रहम् (ख) दुर्निग्रहाः (ग) दुर्निग्रहो (घ) दुर्निग्रहा (ii) पिता पुत्राय महत् विद्याधनं **यच्छन्ति**। (क) यच्छतः (ख) यच्छामि (ग) यच्छसि (घ) यच्छति (iii) वत्स! त्वं किमर्थम् इदं दिव्यं चक्रं **वाञ्छति**? (क) वाञ्छामः (ख) वाञ्छामि (ग) वाञ्छसि (घ) वाञ्छन्ति	3×1=3

'घ' भागः

पठितावबोधनम् (30 अङ्काः)

12.	अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - अथ व्रजन्तौ तौ गर्तसङ्कुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम् -भो भो बालकाः! कथमत्र नतोन्नते विषमे मार्गे क्रीडथ ? यदि कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्। तच्छ्रुत्वा तेषु कश्चित् उद्दण्डः बालकः उवाच - अयि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं श्रेयस्करम् ? अनेन वचसा प्रतिहतान्तःकरणः प्रच्छन्नभाग्यः अचिन्तयत्- 'किम् इदं वचनं विशेषेण माम् एव लक्ष्यीकरोति? अहो! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा। गुरूपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते। अद्य आरभ्य पापपथं त्यज्यामि इति विचिन्त्य मित्रं दुष्टबुद्धिम् अवदत् - "सखे! यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्।' दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत्। प्रच्छन्नभाग्यः तु समुपजातविवेकः विवेकः स्वगृहं प्रतिनिवृत्तः। I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)	5

	(i) प्रतिहतान्तःकरणः कः आसीत्? (ii) समुपजातविवेकः प्रच्छन्नभाग्यः कुत्र प्रतिनिवृत्तः? (iii) कीदृशः बालकः उवाच? **II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) समुपजातविवेकः प्रच्छन्नभाग्यः किम् अकरोत्? (ii) अथ व्रजन्तौ तौ मार्गे क्रीडतः बालकान् दृष्ट्वा किम् अवदताम्? (iii) प्रतिहतान्तःकरणः प्रच्छन्नभाग्यः किम् अचिन्तयत्? **III. (अ) निर्देशानुसारम् उत्तरत -** (i) 'अद्य आरभ्य पापपथं त्यज्यामि।' अत्र किं क्रियापदम् अस्ति? (ii) 'दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत्।' अत्र कर्तृपदं किम्? **अथवा** **(आ) निर्देशानुसारम् उत्तरत -** (i) 'दुर्वचनानि' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्? (ii) 'उद्दण्डः' इत्यस्य विशेष्यपदं गद्यांशात् चित्वा लिखत।	2×½=1 2×1=2 2×1=2
13.	**अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।** **कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥** **विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।** **अन्येषां वदने ये तु ते चक्षुर्नामनी मते॥** **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) नरः कीदृशं वेगं सोढुं शक्नोति? (ii) सुखी नरः कस्मात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति? (iii) के एव चक्षुष्मन्तः प्रकीर्तिताः? **II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्** (i) कीदृशः नरः सुखी भवति? (ii) के चक्षुर्नामनी मते? (iii) विद्वांसः कुत्र चक्षुष्मन्तः प्रकीर्तिताः? **III. (अ) निर्देशानुसारम् उत्तरत -** (i) 'शक्नोति इह एव यः सोढुम्।' अत्र क्रियापदं किम्? (ii) 'मूर्खाः' इत्यस्य किं विलोमपदं पद्ये प्रयुक्तम्? **अथवा** **(आ) निर्देशानुसारम् उत्तरत -** (i) 'दुःखी' शब्दस्य कः विलोमः प्रयुक्तः? (ii) 'मुखे' इत्यस्य पर्यायपदं लिखत।	5 2×½=1 2×1=2 2×1=2

14.	**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** सभागारः। मञ्चे विद्यालयस्य प्रधानाचार्यः, प्रदेशस्य पर्यटनाधिकारी केचित् अध्यापकाः च उपविष्टाः सन्ति।) **पर्यटनाधिकारी** - (ध्वनिविस्तारकयन्त्रस्य समीपम् आगत्य) प्रियच्छात्राः! अभिनन्दनं भवताम् अस्मिन् प्रदेशे। प्रसीदामि यत् भवन्तः अस्य रम्यस्य प्रदेशस्य विषये ज्ञातुम् अति उत्सुकाः। एतदर्थं स्थलानां दर्शनाय प्रबन्धः अपि वर्तते, परन्तु सम्प्रति प्रश्नोत्तरमाध्यमेन भवतां जिज्ञासां शमयितुम् इच्छामि। प्रथमं तु अहम् एव एकं प्रश्नं पृच्छामि। अस्य प्रदेशस्य नाम 'अरुणाचलः' कथं जातम्? अनुमीयताम्। **हिमांशुः -** अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः। अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति। अतः अरुणस्य प्रदेशः अरुणाचलः। **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) अरुणः कस्य पर्यायः? (ii) प्रधानाचार्यः कुत्र उपविष्टः आसीत्? (iii) सूर्यस्य प्रकाशः सर्वप्रथमं कं प्रदेशं स्पृशति? **II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्** (i) पर्यटनाधिकारी किमर्थं प्रसीदति? (ii) पर्यटनाधिकारी केन छात्राणां जिज्ञासां शमयितुम् इच्छति? (iii) हिमांशुः किम् उत्तरं यच्छति? **III. (अ) निर्देशानुसारम् उत्तरत -** (i) 'स्पृशति' इति क्रियापदस्य किं कर्तृपदम्? (ii) 'ज्ञातुम् इच्छाम्' इत्यर्थे किं पदं नाट्यांशे प्रयुक्तम्? **अथवा** **(आ) निर्देशानुसारम् उत्तरत -** (i) 'रम्यस्य प्रदेशस्य' इत्यनयोः पदयोः विशेष्यपदं किम्? (ii) 'प्रथमं तु अहम् एव एकं प्रश्नं पृच्छामि।' अत्र क्रियापदं किम्?	5 2×½=1 2×1=2 2×1=2
15.	**रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत -** (i) **मधुरभाषिणी** वाणी पुरुषं प्रह्लादयति। (ii) हंसः **वर्षर्तौ** तु मानसं पलायसे। (iii) ज्वलन् मेषः **अश्वशालां** प्रविशति। (iv) कामस्य नाशाय **इन्द्रियाणि** वशे करणीयानि। (v) राजा **वैद्यान्** आहूय अश्वरक्षार्थम् अपृच्छत्।	5×1=5
16.अ	**मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत -** **काकस्य गात्रं यदि काञ्चनस्य माणिक्यरत्नं यदि चञ्चुदेशे।** **एकैकपक्षे ग्रथितं मणीनां तथापि काको न तु राजहंसः॥**	4×½=2

	अन्वयः - यदि काकस्य (i) _____ काञ्चनस्य, यदि चञ्चुदेशे (ii) _____, एकैकपक्षे मणीनाम् (iii) _____ तथापि (सः) काकः (एव) न तु (iv) _____।	
	मञ्जूषा	
	ग्रथितम्, गात्रम्, राजहंसः, माणिक्यरत्नम्।	
	अथवा	
आ	**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**	
	माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।	
	धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥	
	भावार्थः - (i) _____ वर्णोच्चारणम्, (ii) _____ स्पष्टतया उच्चारणं, पदानां पृथक्तया (iii) _____, धैर्यम्, स्वरलयादिप्रदर्शने (आत्मविश्वासः) एते षट् श्रेष्ठानां (iv) _____गुणाः सन्ति।	
	मञ्जूषा	
	पाठकानाम्, अक्षराणाम्, कोमलतया, उच्चारणम्।	
17.	**अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**	4×1=4
	(i) **<u>सर्वदा</u>** सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्।	
	(क) सर्वं वदति इति (ख) सर्वाधिका	
	(ग) सर्वं ददाति इति (घ) यदा-कदा	
	(ii) मेषः **<u>महानसं</u>** प्रविश्य यत् पश्यति तद् भक्षयति।	
	(क) हयशालाम् (ख) मन्दिरम्	
	(ग) यज्ञशालाम् (घ) पाकशालाम्	
	(iii) आपत्काले सरांसि त्यक्त्वा दूरं **<u>व्रजसि</u>**।	
	(क) वदसि (ख) गच्छसि	
	(ग) भजसि (घ) नमसि	
	(iv) क्रोधाद् भवति **<u>सम्मोहः</u>**।	
	(क) उद्विग्नता (ख) निर्धनता	
	(ग) एकाग्रता (घ) चञ्चलता	

18.	**मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत-** पूर्वं बोधिसत्त्वः (i) _____ राजा अभवत्। सः बाल्यकालात् एव दानशीलः वृद्धोपसेवी च आसीत्। सः नगरस्य समन्ततः दानशालाः अकारयत्। तत्र देशान्तरेभ्यः अपि (ii) _____ आगत्य दानं प्राप्य सन्तुष्टाः अभवन्। याचकानां सङ्ख्या च क्रमशः (iii) _____ गता। एतत् दृष्ट्वा राजा चिन्तितः अभवत्। सः शरीरस्य (iv) _____ अपि दातुम् उद्यतः अभवत्। एतत् ज्ञात्वा (v) _____ शक्रः तस्य परीक्षणं कर्तुं (vi) _____ रूपं धृत्वा तस्य सम्मुखे आगच्छत्। सः च राजा स्वस्य नेत्रम् एकैकशः नेत्रद्वयमपि तस्य कृते अयच्छत्। इन्द्रः प्रीतः भूत्वा तस्मै (vii) _____ अयच्छत्। येन सः (viii) _____ पारम् अपि द्रष्टुं समर्थः स्यात्। तथा कृत्वा शक्रः अन्तर्हितः अभवत्। **मञ्जूषा** देवाधिपतिः, न्यूनताम्, अङ्गानि, पर्वतानाम्, शिवीनाम्, जनाः, नेत्रहीनयाचकस्य, नेत्रद्वयम्।	8×½=4

---------- 0000 ----------

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)

आदर्श-प्रश्नपत्रम्

कक्षा - दशमी (2026-27)

अवधिः - होरात्रयम् **अङ्कयोजना उत्तरसङ्केताश्च** **पूर्णाङ्काः - 80**

अवधातव्यम् -

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः नवम्यां कक्षायाम् अपि पालनीयः।)**
3. गद्यांशे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

	'क' भागः **अपठितावबोधनम्** **(10 अङ्काः)**	
1.	**गद्यांशः** **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) लाभालाभयोः (ii) साहसिनः (iii) श्रीः **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) अधुना आवश्यकता अस्ति यद् देशस्य भाविनः नागरिकाः छात्राः साहसिनः कर्त्तव्यनिष्ठाश्च भवेयुः।	2×1=2 2×2=4

	(ii) साहसिनः विद्यार्थिनः सदैव कर्मयोगिनः भूत्वा सम्यक्पदम् अलङ्कुर्वन्ति। (iii) श्रमस्य साहसस्य च योग्यः फलितांशः प्राप्यते। इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। **श्रमसाहसयोः महत्त्वम् अथवा अन्यत् किमपि उचितं शीर्षकम्।** छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितं मूल्याङ्कनं करणीयम्। ई. यथानिर्देशम् उत्तरत - (i) (ख) जनाः (ii) (घ) अनुसरन्ति (iii) (ग) साहसिनः	1 3×1=3
	भागः 'ख' **रचनात्मकं कार्यम्**	
2.	भवान् सुरेशः! संस्कृतसम्भाषणशिविरविषये स्वमित्रं प्रति लिखितं परं मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत। रोहिणी सेक्टर 9, **(i) दिल्लीतः** तिथिः _____ प्रिय मित्र राकेश ! सस्नेहं **(ii) नमस्ते** अत्र सर्वगतं कुशलम्। मन्ये भवान् अपि **(iii) कुशली** स्यात्। गतसप्ताहे अस्माकं विद्यालये संस्कृतसम्भाषणशिबिरम् **(iv) आयोजितम्** आसीत्। दश दिनानि यावत् वयं संस्कृतेन सम्भाषणस्य **(v) अभ्यासं** कृतवन्तः। एकस्याः लघुनाटिकायाः मञ्चनं **(vi) वयम्** अकुर्म। अहं तु विदूषकस्य **(vii) अभिनयं** कृतवान्। सर्वे जनाः हसित्वा वारं वारं करतलध्वनिम् अकुर्वन्। अहं तु इदानीं सर्वदा संस्कृतेन एव वदामि। मम शिक्षकः अपि **(viii) मयि** स्निह्यति। त्वम् अपि प्रयत्नं कुरु। नूनं यशस्वी भविष्यसि। पितरौ **(ix) प्रति** मम प्रणामाञ्जलिं निवेदयतु। तव **(x) अभिन्नहृदयः ,** सुरेशः	10×½=5
3. अ	चित्रवर्णनम् अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति	5×1=5

	अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते। **अथवा**	
आ	**अनुच्छेदलेखनम्** अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः।	
4. अ	**संवादपूर्तिः** एकदा कोऽपि अहङ्कारी विद्वान् नागरिकः नौकया नदीपारं गच्छति स्म। सः आकाशं पश्यति, नाविकं च पृच्छति – **नागरिकः** - भो नाविक! नक्षत्रविद्यां जानासि किम् ? **नाविकः - (i) अहं न जानामि महोदय! परम् अहं प्रतिदिनं तारकाणि दृष्ट्वा नमामि।** **नागरिकः** - (हसन्) भो मूर्ख! तव जीवनस्य चतुर्थांशः नष्टः। त्वं गणितं पठितवान् किम्? **नाविकः - (ii) महोदय! अहं केवलं गणनाम् एव जानामि, न तु सम्पूर्णं गणितम्।** **नागरिकः** - एवं वा? तर्हि तव जीवनस्य अर्धं व्यर्थं जातम्। (वृक्षपङ्क्तीः दृष्ट्वा) किं त्वं वृक्षविज्ञानं जानासि ? **नाविकः - (iii) अहं कथं वृक्षविज्ञानं जानीयाम्? अहं तु नौकां चालयित्वा स्वोदरं पूरयामि।** **नागरिकः** - हा हन्त! तव जीवनस्य त्रिचतुर्थांशः भागः व्यर्थं गतः । **नाविकः – (iv) पश्यतु पश्यतु, प्रबलः वायुप्रकोपः उत्पन्नः। अहं तु जले कूर्दित्वा तरामि।** **नागरिकः** - भोः! एषा नौका तु दोलायते। अत्र जलमपि प्रविशति। किं करोमि? अहं तु तरणं न जानामि। **नाविकः - (v) तरणं न जानाति भवान् ? तर्हि नूनं भवतः तु सम्पूर्णमेव जीवनमेव नष्टम्।** **अथवा**	5×1=5
आ	**कथापूर्तिः** एकदा केचन शिष्याः **(i) भिक्षाटनं** कुर्वन्ति स्म। तदैव एकः गजः महता वेगेन तस्मिन् **(ii) मार्गे** आगच्छत्। गजस्य उपरि उपविष्टः **(iii) हस्तिपकः** उच्चस्वरेण पुनः पुनः घोषयति स्म - अपसरन्तु, अपसरन्तु इति। सर्वे **(iv) शिष्याः** धावितवन्तः। यथा सर्वेषु वस्तुषु **(v) ईश्वरः** अस्ति तथा गजे अपि अस्ति इति विचिन्त्य एकः शिष्यः तत्रैव **(vi) स्थितवान्**। तावति काले गजः तं स्वशुण्डेन गृहीत्वा दूरे क्षिप्तवान्। शिष्याः मूर्च्छितं तं गुरुकुलम् अनयन्। **(vii) लब्धसंज्ञं** तं गुरुः अपृच्छत् - “वत्स! त्वम् एवं किमर्थम् अकरोः इति।" शिष्यः **(viii) अवदत्** - "गुरुवर्य! भवद्भिः एव शिक्षितम् यत् ईश्वरः सर्वेषु अस्ति, अतः अहं गजे अपि **(ix) ईश्वरं** मत्वा तत्र अतिष्ठम्	10×½=5

	इति।" गुरुः उक्तवान् - "वत्स! यथा गजे तथैव हस्तिपके अपि ईश्वरः इति त्वया **(x) कथं** न चिन्तितम् इति।"	
	भागः 'ग' **अनुप्रयुक्तव्याकरणम्**	
5. अ	सन्धिः सन्धिच्छेदश्च (i) सञ्चयात् (ii) सुगन्धिश्च (iii) लोके + अस्मिन् (iv) पर्जन्यः + तत् अथवा आ सन्धिः सन्धिच्छेदश्च (i) च + एव (ii) अग्निरिव (iii) सः + विवेकः (iv) काकादन्यः	4×1=4
6.	समस्तपदं विग्रहः च (i) (ग) उचितम् अनतिक्रम्य (ii) (क) चक्षुषः दानम् (iii) (ख) अनासक्ता (iv) (घ) व्यासनारदौ	4×1=4
7.	प्रत्ययाः (i) (ख) प्रधान + टाप् (ii) (घ) चक्षुष्मन्तः (iii) (क) दानशीलताम् (iv) (ग) दृश् + अनीयर्	4×1=4
8. अ	वाच्यम् **राकेशः** - प्रातः काले **(i) भवान्** किं करोति? **राघवः** – प्रातःकाले मया पाठः स्मर्यते। **राकेशः** - किं भवान् भ्रमणाय न गच्छति?	3×1=3

	राघवः – अहम् अस्वस्थः अस्मि, अतः **(ii) मया** भ्रमणाय न गम्यते। **राकेशः** - किं भवान् नित्यं व्यायामम् अपि करोति ? **राघवः** - आम् ! मया नित्यं व्यायामः **(iii) क्रियते** । अथवा	
आ	(i) अहं तुभ्यं गदां शक्तिं च **<u>ददामि</u>**। (ii) **<u>अहं</u>** शीतले जले तिष्ठामि। (iii) अहम् **<u>आचार्यं</u>** पृच्छामि।	
9.	समयः (i) सार्ध-द्वादशवादने (ii) पादोन-नववादनपर्यन्तम् (iii) सपाद-पञ्चवादने	3×1=3
10.	अव्ययपदानि (i) यत् (ii) इव (iii) इति (iv) च	4×1=4
11.	अशुद्धिसंशोधनम् (i) (क) दुर्निग्रहम् (ii) (घ) यच्छति (iii) (ग) वाञ्छसि	3×1=3
	भागः 'घ' **पठितावबोधनम्**	
12.	अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (i) प्रच्छन्नभाग्यः (ii) स्वगृहम् (iii) उद्दण्डः II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (i) समुपजातविवेकः प्रच्छन्नभाग्यः स्वगृहं प्रतिनिवृत्तः। (ii) अथ व्रजन्तौ तौ मार्गे क्रीडतः बालकान् दृष्ट्वा अवदताम् - यदि कश्चित् गर्ते	5 2×½=1 2×1=2

	पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्। (iii) प्रतिहतान्तःकरणः प्रच्छन्नभाग्यः अचिन्तयत् - 'किम् इदं वचनं विशेषेण माम् एव लक्ष्यीकरोति? अहो! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा। गुरूपदेशेन इव अनेन बालचचसा मम चक्षुषी समुन्मीलिते। III. (अ) निर्देशानुसारम् उत्तरत - (i) त्यज्यामि (ii) दुष्टबुद्धिः अथवा (आ) निर्देशानुसारम् उत्तरत - (i) सद्वचनानि (ii) बालकः	2×1=2
13.	पद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (i) कामक्रोधोद्भवम् (ii) शरीरविमोक्षणात् (iii) विद्वांसः II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (i) यः शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगम् सोढुं शक्नोति सः सुखी नरः भवति। (ii) अन्येषां वदने ये तु ते चक्षुर्नामनी मते। (iii) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः। III. (अ) निर्देशानुसारम् उत्तरत - (i) शक्नोति (ii) विद्वांसः अथवा (आ) निर्देशानुसारम् उत्तरत - (i) सुखी (ii) वदने	5 2×½=1 2×1=2 2×1=2
14.	अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (i) सूर्यस्य (ii) मञ्चे (iii) अरुणाचलप्रदेशम् II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)	5 2×½=1 2×1=2

	(i) पर्यटनाधिकारी प्रसीदति यतः छात्राः अस्य अरुणाचलप्रदेशस्य विषये ज्ञातुम् अति उत्सुकाः सन्ति। (ii) पर्यटनाधिकारी प्रश्नोत्तरमाध्यमेन छात्राणां जिज्ञासां शमयितुम् इच्छति। (iii) हिमांशु उत्तरति यत् अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः। अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति। अतः अरुणस्य प्रदेशः अरुणाचलः। III. (अ) निर्देशानुसारम् उत्तरत - (i) प्रकाशः (ii) जिज्ञासाम् अथवा (आ) निर्देशानुसारम् उत्तरत - (i) प्रदेशस्य (ii) पृच्छामि	2×1=2
15.	प्रश्ननिर्माणं कुरुत - (i) **कीदृशी** वाणी पुरुषं प्रह्लादयति? (ii) हंसः **कदा / कस्मिन्** तु मानसं पलायसे? (iii) ज्वलन् मेषः **कुत्र / कां** प्रविशति? (iv) कामस्य नाशाय **कानि** वशे करणीयानि? (v) राजा **कान्** आहूय अश्वरक्षार्थम् अपृच्छत्?	5×1=5
16. अ	अन्वयपूर्तिः अन्वयः - यदि काकस्य **(i) गात्रं** काञ्चनस्य, यदि चञ्चुदेशे **(ii) माणिक्यरत्नम्**, एकैकपक्षे मणीनाम् **(iii) ग्रथितं** तथापि (सः) काकः (एव) न तु **(iv) राजहंसः** । अथवा	4×½=2
आ	भावार्थपूर्तिः भावार्थः - **(i) कोमलतया** वर्णोच्चारणम्, **(ii) अक्षराणां** स्पष्टतया उच्चारणं, पदानां पृथक्तया **(iii) उच्चारणम्**, धैर्यम्, स्वरलयादिप्रदर्शने (आत्मविश्वासः) एते षट् श्रेष्ठानां **(iv) पाठकानां** गुणाः सन्ति।	
17.	प्रसङ्गानुकूलम् उचितार्थचयनम् (i) (ग) सर्वं ददाति इति (ii) (घ) पाकशालाम् (iii) (ख) गच्छसि (iv) (क) उद्विग्नता	4×1=4

18.	पठितकथा-पूर्तिः - पूर्वं बोधिसत्त्वः (i)**शिवीनां** राजा अभवत्। सः बाल्यकालात् एव दानशीलः वृद्धोपसेवी च आसीत्। सः नगरस्य समन्ततः दानशालाः अकारयत्। तत्र देशान्तरेभ्यः अपि **(ii) जनाः** आगत्य दानं प्राप्य सन्तुष्टाः अभवन्। याचकानां सङ्ख्या च क्रमशः **(iii) न्यूनतां** गता। एतत् दृष्ट्वा राजा चिन्तितः अभवत्। सः शरीरस्य **(iv) अङ्गानि** अपि दातुम् उद्यतः अभवत्। एतत् ज्ञात्वा **(v) देवाधिपतिः** शक्रः तस्य परीक्षणं कर्तुं **(vi) नेत्रहीनयाचकस्य** रूपं धृत्वा तस्य सम्मुखे आगच्छत्। सः च राजा स्वस्य नेत्रम् एकैकशः नेत्रद्वयमपि तस्य कृते अयच्छत्। इन्द्रः प्रीतः भूत्वा तस्मै (vii) **नेत्रद्वयम्** अयच्छत्। येन सः **(viii) पर्वतानां** पारम् अपि द्रष्टुं समर्थः स्यात्। तथा कृत्वा शक्रः अन्तर्हितः अभवत्।	8×½=4

----------0000----------

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)

आदर्श-प्रश्नपत्रम् *

कक्षा - दशमी (2025-26)

अवधिः - होरात्रयम् **पूर्णाङ्काः - 80**

सामान्यनिर्देशाः -

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

'क' भागः	**:**	**अपठितावबोधनम्**	**10 अङ्काः**
'ख' भागः	**:**	**रचनात्मककार्यम्**	**15 अङ्काः**
'ग' भागः	**:**	**अनुप्रयुक्तव्याकरणम्**	**25 अङ्काः**
'घ' भागः	**:**	**पठितावबोधनम्**	**30 अङ्काः**

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

'क' भागः

अपठितावबोधनम् (10 अङ्काः)

1.	अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - अयं संसारः जनानां कर्मभूमिः अस्ति। अस्मिन् संसारे यावन्तः जनाः जन्म गृह्णन्ति, तेषां पृथक् पृथक् कर्तव्यानि भवन्ति। एतानि कर्तव्यानि अनेकविधानि भवन्ति। कानिचिद् व्यक्तिगतानि कानिचित् पारिवारिकाणि, कानिचित् सामाजिकानि। कानिचित् नित्यानि भवन्ति कानिचित् च नैमित्तिकानि। एतेषां सर्वेषां कर्तव्यानां पालनं मनुष्यस्य व्यक्तिगतहिताय देशहिताय च परमावश्यकं भवति। परमद्य जनेषु कर्तव्यपालनं प्रति न कापि निष्ठा। कोऽपि श्रमेण सत्यतया निष्ठया च कार्यं कर्तुं न वाञ्छति। अल्पेन एव प्रयासेन ते कार्यसिद्धिम् इच्छन्ति। ते केवलं स्वार्थपूर्तिं कर्तुम् इच्छन्ति। अधिकाराय तु सर्वे प्रयतन्ते परं कर्तव्यं प्रति कोऽपि ध्यानं न ददाति। सत्यमेतद् यावद् वयं परिश्रमपूर्वकं श्रद्धापूर्वकं च स्वकर्तव्यानि न पालयामः तावद् देशस्य समाजस्य च उन्नतिः भवितुं न अर्हति। कर्तव्यपालनम् एव आत्मना देशस्य च उन्नतेः मूलमन्त्रोऽस्ति। अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)	10 2×1=2

	(i) अयं संसारः केषां कर्मभूमिः अस्ति? (ii) उन्नतेः मूलमन्त्रं किम् अस्ति? (iii) जनाः किं विहाय केवलम् अधिकाराय प्रयतन्ते?	
	आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (i) देशस्य उन्नतिः कदा भवितुम् अर्हति? (ii) कर्तव्यपालनं किमर्थम् आवश्यकम्? (iii) अद्यत्वे जनाः कथं कार्यसिद्धिम् इच्छन्ति?	2×2=4
	इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।	1
	ई. यथानिर्देशम् उत्तरत - (i) 'अयं संसारः कर्मभूमिः अस्ति।' अस्मिन् वाक्ये क्रियापदं किम्? (क) अयम् (ख) संसारः (ग) कर्मभूमिः (घ) अस्ति (ii) 'प्रयत्नं कुर्वन्ति' एतदर्थं किं क्रियापदं गद्यांशे प्रयुक्तम्? (क) प्रयतन्ते (ख) अर्हति (ग) इच्छन्ति (घ) भवन्ति (iii) 'प्रयासेन' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम्? (क) निष्ठा (ख) अल्पेन (ग) सत्यता (घ) श्रमेण	3×1=3

'ख' भागः

रचनात्मकं कार्यम् (15 अङ्काः)

2.	**भवत्याः नाम शर्वाणी। भवत्याः सखी प्रज्ज्वला संस्कृतं पठितुं भवत्याः परामर्शं वाञ्छति। तां प्रेरयितुं लिखितं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पत्रम् उत्तरपुस्तिकायां लिखतु -** डी-401, जनकपुरी (i) ---------- दिनाङ्कः ---------- प्रिय (ii) ---------- सस्नेहं नमस्ते। अत्र कुशलं तत्रास्तु। आशासे त्वम् अपि कुशलिनी स्यात्। भवत्याः पत्रं प्राप्तम्। भवती संस्कृतभाषां पठितुम् इच्छति (iii) ---------- पठित्वा मम प्रसन्नतायाः सीमा नास्ति। एषा भाषा सर्वाधिका (iv) ---------- अस्ति। संस्कृतम् अस्माकं देशस्य प्रतिष्ठा वर्तते। वेदाः, उपनिषदः, रामायणं, महाभारतं, पुराणानि, महाकाव्यानि, कथासाहित्यम् इत्यादिकं सर्वं (v) ---------- अत्यन्तं मार्गदर्शकं, ज्ञानवर्धकं प्रेरणाप्रदं च अस्ति। यथा पुष्पेभ्यः सुगन्धः पृथक् कर्तुं न शक्यते तथैव भारतीयसंस्कृतेः संस्कृतभाषां पृथक् (vi) ---------- न शक्यते। संस्कृतेन सम्भाषणम् अस्माकं हृदयेषु (vii) ---------- वर्धयति हीनभावनां च नाशयति। अतः त्वम् अवश्यं	10×½=5

(viii) ---------- पठ, पठित्वा च अस्याः भाषायाः (ix) ---------- कुरु। एवं वयं भारतमातुः सेवां कृत्वा धन्याः भवामः। सर्वेभ्यः अग्रजेभ्यः मम प्रणामाः अनुजेभ्यः च आशीर्वादाः।

भवत्याः सखी,

(x) ----------

मञ्जूषा

वैज्ञानिकी, प्रचारम्, वाङ्मयम्, प्रज्ज्वले, कर्तुम्, शर्वाणी, इति, गौरवम्, संस्कृतम्, नवदिल्लीतः।

3. अ प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत - 5×1=5



मञ्जूषा

निर्वाचनम्, मतदानकेन्द्रम्, पङ्क्तिबद्धाः, महिलाः, ग्रामीणाः, हस्तेषु परिचयपत्राणि, अधिकारः, जनप्रतिनिधिः, वृक्षाः, प्रतीक्षां कुर्वन्ति।

अथवा

आ मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -

"बालश्रमः"

जलपानगृहेषु, भोजनालयेषु, उद्योगेषु, बालकाः, शिक्षातः, क्रीडनात्, वञ्चिताः, जनाः, ग्रामेभ्यः, आगच्छन्ति, अपि, धनप्राप्त्यर्थम्, कुर्वन्ति, संविधानम्, नियमः ।

4. अ मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत- 5×1=5

छात्राः - (i) ----------

आचार्यः - स्वस्ति, यशस्विनः भवत।

आरुषः - मया श्रुतं यत् श्वः आरभ्य सद्यस्कमाध्यमेन (ऑनलाइन) कक्षा भविष्यति, किमर्थम्?

आचार्यः - (ii) ----------

मोहितः - अस्माकं कक्षाध्यापिका चर्चायां सामान्यरूपेण अकथयत् यत् कदाचित् श्वः आरभ्यः गृहात् एव कक्षा स्वीकरणीया भवेत् इति।

आचार्यः - भवतां कक्षाध्यापिका सम्यक् सूचितवती। ह्यः वायुगुणवत्ता-सूचकाङ्कः महतीं वृद्धिं प्राप्नोत् तस्मात् सर्वकारः जनानां स्वास्थ्यरक्षणाय सद्यस्कमाध्यमेन गृहात् एव पठितुं कार्यं कर्तुं च निर्देशम् अयच्छत्।

नव्या - (iii) ----------

आचार्यः - सत्यं कथयति, वयं शिक्षकाः अपि साक्षात् कक्षायाम् आगत्य पाठयितुम् इच्छामः।

भूमिका - (iv) ----------

आचार्यः - इदानीं तु ईश्वरः एव जानीयात्। यदा प्रदूषणस्य निवारणाय प्रकृतेः च संरक्षणाय वयं जागरूकाः भविष्यामः तदा एव अग्रे एतादृशी विकटा स्थितिः नैव आगमिष्यति।

छात्राः - वयं प्रणं कुर्मः यत् वयं पर्यावरण-रक्षणाय निरन्तरं प्रयासरताः भविष्यामः।

आचार्यः - (v) ----------

मञ्जूषा

(i) महोदय! गृहे मनः न रमते, अत्रैव वयं पठने आनन्दम् अनुभवामः।
(ii) सत्यं, तदैव इयं वसुन्धरा सुरक्षिता भविष्यति।
(iii) भवन्तं कः असूचयत्?
(iv) आचार्य! प्रणमामः।
(v) पुनः कदा विद्यालये एव कक्षा भविष्यति?

अथवा

आ **मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत-** 10×½=5

एकः मृत्तिका-घटः आसीत्। (i) ---------- उपरि स्थितः शरावः यः घटस्य मुखम् आच्छादयति सः एकदा घटम् अपृच्छत् - मित्र घट! मम (ii) ---------- एकः प्रश्नः अस्ति। इदानीं (iii) ---------- अस्ति। यत् किमपि पात्रं यदा भवतः समीपम् आगच्छति तदा भवान् तत्पात्रं (iv) ---------- जलेन परिपूरयति। तानि सर्वाणि पात्राणि जलं स्वीकृत्य तृप्तानि भवन्ति। भवन्तम् एकाकिनं विहाय दूरं गच्छन्ति। (v) ---------- स्वार्थपरायणानि सन्ति, तथापि भवान् तेभ्यः शीतलं जलं प्रदाय तेषु (vi) ---------- करोति। अहं सर्वदा भवता सह एव तिष्ठामि कदापि भवन्तं (vii) ---------- कुत्रापि न गच्छामि परन्तु भवान् मह्यं कदापि बिन्दुमितम् अपि जलं न यच्छति, किमर्थम्? तदा स्मितं कुर्वन् घटः (viii) ---------- अवदत् - एतस्य कारणं भवतः प्रकृतिः अस्ति। तानि सर्वाणि पात्राणि शिरः अवनम्य जलं याचन्ते अहञ्च तेषाम् इच्छां पूरयामि परं भवान् तु सर्वदा मम (ix) ---------- एव तिष्ठति तर्हि कथम् अहं भवते जलं दद्याम्? भवान् अपि शिरः अवनम्य (x) ---------- याचनां करोतु अहं भवन्तम् अपि निराशं न करिष्यामि।

मञ्जूषा

	त्यक्त्वा, घर्मकालः, शिरसि, शीतलेन, मनसि, अनुग्रहम्, घटस्य, मन्दस्वरेण, तानि, जलार्थम्।	
	'ग' भागः **अनुप्रयुक्तव्याकरणम्** **(25 अङ्काः)**	
5. अ	अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (i) स्वाध्यायाभ्यसनं चैव वाङ्मयं **तपः + उच्यते**। (ii) राज्ञः स्वस्य **गात्रेष्वपि** निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्। (iii) मधुमासे कोकिलः **पं + चम** -स्वरेण गायति। (iv) विषयान् ध्यायतः पुंसः **सङ्गस्तेषु** उपजायते।	4×1=4
	अथवा	
आ	अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (i) तेषु **केचित् + दग्धाः**, केचिद् अर्धदग्धाः केचन च पञ्चत्वं गताः। (ii) अये कथं श्रीकृष्णार्जुनौ **युधिष्ठिरश्च**? (iii) मनसः निग्रहम् अहं **वायोः + इव** सुदुष्करं मन्ये। (iv) सुस्वागतं भोः **अरुणाचलेऽस्मिन्**।	
6.	अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (i) पञ्चशतानां बौधभिक्षूणां **निवासयोग्या** स्थली इयम्। (क) निवासं योग्या (ख) निवासस्य योग्या (ग) निवासेन योग्या (घ) निवासाय योग्या (ii) कलशपातशब्देन प्रबुद्धौ तौ **जाया च पतिः च** आश्चर्यचकितौ आस्ताम्। (क) जायापती (ख) जायापतिः (ग) दम्पती (घ) दमपतिः (iii) प्रकृतिमाता **सस्नेहं** सर्वान् बोधयति। (क) स्नेहम् अनतिक्रम्य (ख) स्नेहेन सहितम् (ग) स्नेहस्य अभावः (घ) स्नेहस्य योग्यम् (iv) पितुः उपदेशेन **न सन्तुष्टः** सः एकदा द्वारिकापुरीम् आगच्छत्। (क) असन्तुष्टः (ख) अनुसन्तुष्टः (ग) सन्तोषसहितः (घ) नसन्तुष्टः	4×1=4
7.	अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (i) भवतः **दानवीर + तल्** आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि।	4×1=4

	(क) दानवीरताम् (ख) दानवीरता (ग) दानवीरत्वम् (घ) दानवीरा (ii) कथं **<u>मन्दभाग्या</u>** अहं धैर्यं धारयामि। (क) मन्दभाग्य + तल् (ख) मन्दभाग्य + त्व (ग) मन्दभाग्य + टाप् (घ) मन्दभाग्य + ठक् (iii) अत्र अनेकानि **<u>दर्शनीयानि</u>** स्थलानि सन्ति। (क) दृश् + तव्यत् (ख) दृश् + अनीयर् (ग) दृश् + मतुप् (घ) दृश् + ठक् (iv) एकदा **<u>भगवान्</u>** बोधिसत्त्वः शिवीनां राजा अभवत्। (क) भग + टाप् (ख) भग + ठक् (ग) भग + तल् (घ) भग + मतुप्	
8. अ	**वाच्यानुसारं मञ्जूषायाः उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -** **माहिका** - भूमिके! (i) ---------- किं लिखसि? **भूमिका** - माहिके! मया श्लोकाः लिख्यन्ते। **माहिका** - त्वं कान् (ii) ---------- लिखसि ? **भूमिका** - मया नीतिश्लोकाः लिख्यन्ते। त्वया अधुना किं (iii) ----------? **माहिका** - अहं संस्कृतकथां पठामि। **मञ्जूषा** श्लोकान्, क्रियते, त्वम्। **अथवा**	3×1=3
आ	**वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत -** (i) पिता पुत्राय क्रीडनकं (दा) ---------- । (ii) शताक्ष्या ---------- (गीत) श्रूयन्ते। (iii) ---------- (अध्यापक) छात्राः पाठ्यन्ते।	
9.	**कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत-** (i) सुखदः ---------- (5:30) वादने धावनाय बहिः गच्छति। (ii) नव्या रात्रौ ---------- (12:15) वादनपर्यन्तं गृहपाठम् अकरोत्। (iii) रुचिरा सायं ---------- (6:45) वादने मन्दिरं गच्छति।	3×1=3
10.	**मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -** (i) ---------- मधुरभाषिणी वाणी पुरुषं प्रह्लादयति तथा चन्दनरसः न प्रह्लादयति। (ii) चञ्चलं मनः अभ्यासेन वैराग्येण -------- गृह्यते। (iii) आचारः प्रथमो धर्मः ---------- एतत् विदुषां वचः।	4×1=4

	(iv) अहं ---------- वनं गच्छामि। **मञ्जूषा** इति, तु, च, यथा।	
11.	**अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत -** (i) अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्यः **प्रवहति**। (क) प्रवहसि (ख) प्रवहतः (ग) प्रवहन्ति (घ) प्रवहामि (ii) इन्द्रस्य प्रभावेण राज्ञः सत्यपुण्यबलेन एकं चक्षुः **प्रतिष्ठितः** अभवत्। (क) प्रतिष्ठिता (ख) प्रतिष्ठितम् (ग) प्रतिष्ठिताः (घ) प्रतिष्ठितानि (iii) तर्हि न जानासि **भवान्** तस्य मनोवृत्तिम्। (क) त्वम् (ख) भवन्तः (ग) युवाम् (घ) भवन्तौ	3×1=3

'घ' भागः

पठितावबोधनम् (30 अङ्काः)

12.	**अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** अस्ति कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्य-नामधेयः कश्चित् कुमारः। बाल्ये वयसि विद्यापराङ्मुखः स केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः। एकदा स दुष्टबुद्धिना सार्धं कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः। अथ व्रजन्तौ तौ गर्तसङ्कुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम् -भो भो बालकाः! कथमत्र नतोन्नते विषमे मार्गे क्रीडथ ? यदि कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्। तच्छ्रुत्वा तेषु कश्चित् उद्दण्डः बालकः उवाच - अयि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं श्रेयस्करम् ?	5
	I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (i) कुत्र प्रच्छन्नभाग्य-नामधेयः कश्चित् कुमारः आसीत्? (ii) प्रच्छन्नभाग्यः केन सार्धं धनहरणार्थं ग्रामान्तरं प्रस्थितः? (iii) कीदृशः बालकः उवाच?	2×½=1
	II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (i) उद्दण्डः बालकः किम् अकथयत्? (ii) अथ व्रजन्तौ तौ मार्गे क्रीडतः बालकान् दृष्ट्वा किम् अवदताम्? (iii) प्रच्छन्नभाग्यः कदा केन सह च चौर्यकर्मणि निरतः सञ्जातः?	2×1=2

	III. (अ) निर्देशानुसारम् उत्तरत - 2×1=2 (i) 'कश्चित् उद्दण्डः बालकः उवाच।' अत्र किं कर्तृपदम् अस्ति? (ii) 'स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्।' अत्र क्रियापदं किम्? अथवा (आ) निर्देशानुसारम् उत्तरत - (i) 'त्यक्त्वा' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्? (ii) 'विषमे' इत्यस्य विशेष्यपदं गद्यांशात् चित्वा लिखत।	
13.	अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5 अवक्रता यथा चित्ते तथा वाचि भवेद् यदि। तदेवाहुः महात्मानः समत्वमिति तथ्यतः॥ आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः। तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥ I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×½=1 (i) चित्ते तथा वाचि किं भवेत्? (ii) कः प्रथमो धर्मः? (iii) किं प्राणेभ्योऽपि विशेषतः रक्षेत्? II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् 2×1=2 (i) विदुषां किं वचः? (ii) समत्वं किं भवति? (iii) सदाचारं कथं रक्षेत्? III. (अ) निर्देशानुसारम् उत्तरत - 2×1=2 (i) "तदेवाहुः महात्मानः समत्वमिति तथ्यतः।" अत्र वाक्ये क्रियापदं किम्? (ii) 'सरलता' इत्यस्य किं समानार्थकं पदं प्रयुक्तम्? अथवा (आ) निर्देशानुसारम् उत्तरत - (i) 'प्रथमो धर्मः' इत्यनयोः विशेषणपदं चित्वा लिखत। (ii) 'वाण्याम्' इत्यस्य पर्यायपदं लिखत।	
14.	अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5 [स्थानम् - सरस्तीरम्। समयः प्रभातवेला। तत्र राजहंसः हंसी च विहरतः। नेपथ्ये काकध्वनिः श्रूयते।] **राजहंसः** - अये! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का का' शब्दैः वातावरणम् आकुलीक्रियते? **राजहंसी** - भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति। कर्णकटुशब्दैः	

	काकः - (प्रविश्य सक्रोधम्) आः किम् उक्तवती भवती ? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि। **राजहंसः** - हुं! किमनेन? एतत् कार्यं तु कुक्कुटोऽपि करोति। **काकः** - (विहस्य) कुक्कुटः! अरे अद्य कुतः कुक्कुटाः नगरेषु। अहमेव सर्वत्र सुलभः। I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (i) कर्तव्यपरायणः कः अस्ति? (ii) काकस्य वर्णः कीदृशः अस्ति? (iii) काकध्वनिः कुत्र श्रूयते? II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् (i) राजहंसः राजहंसीं किं पृच्छति? (ii) काकः सक्रोधं किं वदति? (iii) राजहंसी भर्तारं किम् उत्तरति? III. (अ) निर्देशानुसारम् उत्तरत - (i) 'पवित्रम्' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्? (ii) 'करोति' इति क्रियापदस्य कर्तृपदं किम् अत्र प्रयुक्तम्? अथवा (आ) निर्देशानुसारम् उत्तरत - (i) 'वर्णः कृष्णः' इत्यनयोः पदयोः विशेष्यपदं चित्वा लिखत। (ii) 'एतत् कार्यं तु कुक्कुटोऽपि करोति' अस्मिन् वाक्ये क्रियापदं किम्?	2×½=1 2×1=2 2×1=2
15.	रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (i) **अनुद्वेगकरं** वाक्यं वाङ्मयं तपः उच्यते। (ii) कामः एव **अस्माकं** शत्रुः। (iii) गगनात् सहस्रशः **उल्काः** भूमौ पतन्ति। (iv) अरुणाचलप्रदेशे अनेके **उत्सवाः** मान्यन्ते। (v) **दानशालासु** विचरन् राजा अचिन्तयत्।	5×1=5
16.अ	मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत - **शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।** **ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः॥** अन्वयः - शुश्रूषा (i) --------- च एव, ग्रहणम् तथा (ii) ---------, ऊह-अपोह-अर्थविज्ञानम्, (iii) ---------- च (iv) ---------- (सन्ति)। मञ्जूषा - तत्त्वज्ञानम्, श्रवणम्, धीगुणाः, धारणम्। अथवा	4×½=2

आ	मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत - **असंशयं महाबाहो ! मनो दुर्निग्रहं चलम्।** **अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते॥** भावार्थः- हे महाबाहो! अत्र संशयः नास्ति यत् एतत् (i) ---------- अतीव चञ्चलम् अस्ति। इदं (ii) ..... नियन्त्रितं भवति परन्तु यदि वयं पुनः पुनः (iii) ---------- कुर्मः, विरक्ताः च भवामः तदा निश्चयेन एतत् वशीकर्तुं (iv) ----------। मञ्जूषा - बहुकष्टेन, अभ्यासम्, शक्नुमः, मनः।	
17.	अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (i) वनौषधीनां तु अयं **स्रोतः** एव। (क) प्रवाहः (ख) निर्झरः (ग) उद्गमस्थलम् (घ) प्रकारः (ii) पवनः **स्तब्धः** जातः। (क) स्वच्छः (ख) आरब्धः (ग) प्रदूषितः (घ) स्थगितः (iii) शिष्यः आचार्यात् **पादम्** आदत्ते। (क) श्लोकस्य पङ्क्तिः (ख) चतुर्थांशम् (ग) चरणम् (घ) ग्रन्थम् (iv) राज्ञः नेत्रदान-निश्चयं ज्ञात्वा अमात्याः **विषण्णाः** अभवन्। (क) खिन्नाः (ख) विमुखाः (ग) चिन्तिताः (घ) प्रसन्नाः	4×1=4
18.	मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत- कस्मिंञ्चित् नगरे चन्द्रः (i) ---------- एकः भूपतिः अवसत्। तस्य पुत्राः वानरक्रीडारताः प्रतिदिनं वानरसमूहं (ii) --------भोज्यपदार्थैः सन्तुष्टं कुर्वन्ति स्म। तत्रैव राजगृहे बालवाहनयोग्यं मेषयूथम् अपि (iii) ---------। तत्र एकः मेषः जिह्वायाः लोलुपतावशात् अहर्निशं महानसं प्रविश्य तत्र यद् वस्तु पश्यति तदेव (iv) ---------- स्म। ततः पाचकाः यत्किञ्चित् काष्ठं मृत्तिकापात्रं कांस्यपात्रं ताम्रपात्रं वा पश्यन्ति स्म, तेन एव शीघ्रं ताडयन्ति स्म। मेषस्य सूपकाराणां च (v)--------- दृष्ट्वा बुद्धिमान् वानरयूथपतिः अचिन्तयत्- "एतेषां कलहो (vi) ------ हिताय नास्ति।" एवं चिन्तयित्वा सः सर्वान् वानरान् आहूय एकान्ते अवदत्- (vii) --------- प्रतिदिनं मेषेण सह सूपकाराणाम् अयं कलहः नूनम् अस्माकं विनाशस्य कारणं भविष्यति अतः वयत् एतत् (viii) ---------- त्यक्त्वा वनं गच्छामः। तस्य इमं परामर्शम् अश्रद्धेयं मत्वा रसनास्वादलुब्धाः वानराः गन्तुं सिद्धाः न अभवन्। मञ्जूषा भोः बान्धवाः!, आसीत्, कलहम्, नामकः, राजभवनम्, विविधैः, वानराणाम्, खादति।	8×½=4

----------0000----------

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)

आदर्श-प्रश्नपत्रम्

कक्षा - दशमी (2025-26)

अवधिः - होरात्रयम् **अङ्कयोजना उत्तरसङ्केताश्च** **पूर्णाङ्काः - 80**

अवधातव्यम् -

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः नवम्यां कक्षायाम् अपि पालनीयः।)**
3. गद्यांशे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

	'क' भागः **अपठितावबोधनम्** **(10 अङ्काः)**	
1.	**गद्यांशः** **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) जनानाम् (ii) कर्तव्यपालनम् (iii) कर्तव्यम् **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) यदा वयं परिश्रमपूर्वकं श्रद्धापूर्वकं च स्वकर्तव्यानि पालयामः तदा देशस्य उन्नतिः भवितुम् अर्हति।	2×1=2 2×2=4

	(ii) कर्तव्यानां पालनं मनुष्यस्य व्यक्तिगतहिताय देशहिताय च परमावश्यकं भवति। (iii) अद्यत्वे जनाः अल्पेन एव प्रयासेन कार्यसिद्धिम् इच्छन्ति। इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1 **कर्तव्यपालनम् अथवा अन्यत् किमपि उचितं शीर्षकम्।** छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितं मूल्याङ्कनं करणीयम्। ई. यथानिर्देशम् उत्तरत - 3×1=3 (i) (घ) अस्ति (ii) (क) प्रयतन्ते (iii) (ख) अल्पेन	
	भागः 'ख' **रचनात्मकं कार्यम्**	
2.	पत्रलेखनम् भवत्याः नाम शर्वाणी। भवत्याः सखी प्रज्ज्वला संस्कृतं पठितुं भवत्याः परामर्शं वाञ्छति। तां प्रेरयितुं लिखितं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पत्रम् उत्तरपुस्तिकायां लिखतु - डी-401, जनकपुरी **(i) नवदिल्लीतः** दिनाङ्कः ---------- प्रिय **(ii) प्रज्ज्वले !** सस्नेहं नमस्ते। अत्र कुशलं तत्रास्तु। आशासे त्वम् अपि कुशलिनी स्यात्। भवत्याः पत्रं प्राप्तम्। भवती संस्कृतभाषां पठितुम् इच्छति **(iii) इति** पठित्वा मम प्रसन्नतायाः सीमा नास्ति। एषा भाषा सर्वाधिका **(iv) वैज्ञानिकी** अस्ति। संस्कृतम् अस्माकं देशस्य प्रतिष्ठा वर्तते। वेदाः, उपनिषदः, रामायणं, महाभारतं, पुराणानि, महाकाव्यानि, कथासाहित्यम् इत्यादिकं सर्वं **(v) वाङ्मयम्** अत्यन्तं मार्गदर्शकं, ज्ञानवर्धकं प्रेरणाप्रदं च अस्ति। यथा पुष्पेभ्यः सुगन्धः पृथक् कर्तुं न शक्यते तथैव भारतीयसंस्कृतेः संस्कृतभाषां पृथक् (vi) **कर्तुं** न शक्यते। संस्कृतेन सम्भाषणम् अस्माकं हृदयेषु **(vii) गौरवं** वर्धयति, हीनभावनां च नाशयति। अतः त्वम् अवश्यं **(viii) संस्कृतं** पठ, पठित्वा च अस्याः भाषायाः **(ix) प्रचारं** कुरु। एवं वयं भारतमातुः सेवां कृत्वा धन्याः भवामः। सर्वेभ्यः अग्रजेभ्यः मम प्रणामाः अनुजेभ्यः च आशीर्वादाः। भवत्याः सखी, **(x) शर्वाणी**	10×½=5

3. अ	चित्रवर्णनम् अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते। अथवा	5×1=5
आ	अनुच्छेदलेखनम् अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः।	
4. अ	संवादपूर्तिः **छात्राः -** **(i) आचार्य! प्रणमामः।** **आचार्यः -** स्वस्ति, यशस्विनः भवत। **आरुषः -** मया श्रुतं यत् श्वः आरभ्य सद्यस्कमाध्यमेन (ऑनलाइन) कक्षा भविष्यति, किमर्थम्? **आचार्यः - (ii) भवन्तं कः असूचयत्?** **मोहितः -** अस्माकं कक्षाध्यापिका चर्चायां सामान्यरूपेण अकथयत् यत् कदाचित् श्वः आरभ्यः गृहात् एव कक्षा स्वीकरणीया भवेत् इति। **आचार्यः -** भवतां कक्षाध्यापिका सम्यक् सूचितवती। ह्यः वायुगुणवत्ता-सूचकाङ्कः महतीं वृद्धिं प्राप्नोत् तस्मात् सर्वकारः जनानां स्वास्थ्यरक्षणाय सद्यस्कमाध्यमेन गृहात् एव पठितुं कार्यं कर्तुं च निर्देशम् अयच्छत्। **नव्या -** **(iii) महोदय! गृहे मनः न रमते, अत्रैव वयं पठने आनन्दम् अनुभवामः** **आचार्यः -** सत्यं कथयति, वयं शिक्षकाः अपि साक्षात् कक्षायाम् आगत्य पाठयितुम् इच्छामः। **भूमिका - (iv) पुनः कदा विद्यालये एव कक्षा भविष्यति?** **आचार्यः -** इदानीं तु ईश्वरः एव जानीयात्। यदा प्रदूषणस्य निवारणाय प्रकृतेः च संरक्षणाय वयं जागरूकाः भविष्यामः तदा एव अग्रे एतादृशी विकटा स्थितिः नैव आगमिष्यति। **छात्राः -** वयं प्रणं कुर्मः यत् वयं पर्यावरण-रक्षणाय निरन्तरं प्रयासरताः भविष्यामः। **आचार्यः - (v) सत्यं, तदैव इयं वसुन्धरा सुरक्षिता भविष्यति।**	5×1=5

	अथवा	
आ	**कथापूर्तिः** एकः मृत्तिका-घटः आसीत्। **(i) घटस्य** उपरि स्थितः शरावः यः घटस्य मुखम् आच्छादयति सः एकदा घटम् अपृच्छत् - मित्र घट! मम **(ii) मनसि** एकः प्रश्नः अस्ति। इदानीं **(iii) घर्मकालः** अस्ति। यत् किमपि पात्रं यदा भवतः समीपम् आगच्छति तदा भवान् तत्पात्रं **(iv) शीतलेन** जलेन परिपूरयति। तानि सर्वाणि पात्राणि जलं स्वीकृत्य तृप्तानि भवन्ति। भवन्तम् एकाकिनं विहाय दूरं गच्छन्ति। **(v) तानि** स्वार्थपरायणानि सन्ति, तथापि भवान् तेभ्यः शीतलं जलं प्रदाय तेषु **(vi) अनुग्रहं** करोति। अहं सर्वदा भवता सह एव तिष्ठामि कदापि भवन्तं **(vii) त्यक्त्वा** कुत्रापि न गच्छामि परन्तु भवान् मह्यं कदापि बिन्दुमितम् अपि जलं न यच्छति, किमर्थम्? तदा स्मितं कुर्वन् घटः **(viii) मन्दस्वरेण** अवदत् - एतस्य कारणं भवतः प्रकृतिः अस्ति। तानि सर्वाणि पात्राणि शिरः अवनम्य जलं याचन्ते अहञ्च तेषाम् इच्छां पूरयामि परं भवान् तु सर्वदा मम **(ix) शिरसि** एव तिष्ठति तर्हि कथम् अहं भवते जलं दद्याम्? भवान् अपि शिरः अवनम्य **(x) जलार्थं** याचनां करोतु अहं भवन्तम् अपि निराशं न करिष्यामि।	10×½=5
	भागः 'ग' **अनुप्रयुक्तव्याकरणम्**	
5. अ	**सन्धिः सन्धिच्छेदश्च** (i) तप उच्यते। (ii) गात्रेषु + अपि (iii) पञ्चम (iv) सङ्गः + तेषु	4×1=4
	अथवा	
आ	**सन्धिः सन्धिच्छेदश्च** (i) केचिद् दग्धाः (ii) युधिष्ठिरः + च (iii) वायोरिव (iv) अरुणाचले + अस्मिन्।	
6.	**समस्तपदं विग्रहः च** (i) (घ) निवासाय योग्या (ii) (ग) दम्पती	4×1=4

	(iii) (ख) स्नेहेन सहितम् (iv) (क) असन्तुष्टः	
7.	**प्रत्ययाः** (i) (क) दानवीरताम् (ii) (ग) मन्दभाग्य + टाप् (iii) (ख) दृश् + अनीयर् (iv) (घ) भग + मतुप्	4×1=4
8. अ आ	**वाच्यम्** **माहिका** - भूमिके! **(i) त्वं** किं लिखसि? **भूमिका** - माहिके! मया श्लोकाः लिख्यन्ते। **माहिका** - त्वं कान् **(ii) श्लोकान्** लिखसि ? **भूमिका** - मया नीतिश्लोकाः लिख्यन्ते। त्वया अधुना किं **(iii) क्रियते** ? **माहिका** - अहं संस्कृतकथां पठामि। **अथवा** (i) पिता पुत्राय क्रीडनकं (दा) **ददाति / यच्छति।** (ii) शताक्ष्या **गीतानि** (गीत) श्रूयन्ते। (iii) **अध्यापकेन /अध्यापकाभ्याम्/ अध्यापकैः** (अध्यापक) छात्राः पाठ्यन्ते।	3×1=3
9.	**समयः** (i) सार्ध-पञ्चवादने (ii) सपाद-द्वादशवादनपर्यन्तम् (iii) पादोन-सप्तवादने	3×1=3
10.	**अव्ययपदानि** (i) यथा (ii) च (iii) इति (iv) तु	4×1=4
11.	**अशुद्धिसंशोधनम्** (i) (ग) प्रवहन्ति (ii) (ख) प्रतिष्ठितम्	3×1=3

	(iii) (क) त्वम्	
	भागः 'घ' **पठितावबोधनम्**	
12.	अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -	5
	I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)	2×½=1
	(i) कर्मपुरनगरे / कर्मपुरनाम्नि नगरे	
	(ii) दुष्टबुद्धिना	
	(iii) उद्दण्डः	
	II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)	2×1=2
	(i) उद्दण्डः बालकः अकथयत् - अयि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं श्रेयस्करम् ?	
	(ii) अथ व्रजन्तौ तौ मार्गे क्रीडतः बालकान् दृष्ट्वा अवदताम् - यदि कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्।	
	(iii) प्रच्छन्नभाग्यः बाल्ये वयसि विद्यापराङ्मुखः स केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः।	
	III. (अ) निर्देशानुसारम् उत्तरत -	2×1=2
	(i) बालकः	
	(ii) अनुभवेत्	
	अथवा	
	(आ) निर्देशानुसारम् उत्तरत -	
	(i) परित्यज्य	
	(ii) मार्गे	
13.	पद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -	
	I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)	5
	(i) अवक्रता	2×½=1
	(ii) आचारः	
	(iii) सदाचारम्	
	II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)	2×1=2
	(i) आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।	
	(ii) यथा चित्ते अवक्रता तथा यदि वाचि भवेद् तदेव समत्वं भवति।	
	(iii) सदाचारं प्राणेभ्योऽपि विशेषतः रक्षेत्।	
	III. (अ) निर्देशानुसारम् उत्तरत -	2×1=2

	(i) आहुः (ii) अवक्रता **अथवा** **(आ) निर्देशानुसारम् उत्तरत -** (i) प्रथमः (ii) वाचि	
14.	**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **I. एकपदेन उत्तरत -** **(केवलं प्रश्नद्वयम्)** (i) काकः (ii) कृष्णः (iii) नेपथ्ये **II. पूर्णवाक्येन उत्तरत -** **(केवलं प्रश्नद्वयम्)** (i) राजहंसः राजहंसीं पृच्छति - अये! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का का' शब्दैः वातावरणम् आकुलीक्रियते? इति (ii) काकः सक्रोधं वदति -आः किम् उक्तवती भवती? यदि अहं कृष्णवर्णः तर्हिश्री रामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि इति। (iii) राजहंसी भर्तारम् उत्तरति - भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति। कर्णकटुशब्दैः ...इति। **III. (अ) निर्देशानुसारम् उत्तरत -** (i) मेध्यम् (ii) कुक्कुटः **अथवा** **(आ) निर्देशानुसारम् उत्तरत -** (i) वर्णः (ii) करोति	5 2×½=1 2×1=2 2×1=2
15.	**प्रश्ननिर्माणं कुरुत -** (i) **कीदृशं** वाक्यं वाङ्मयं तपः उच्यते? (ii) कामः एव **केषां** शत्रुः? (iii) गगनात् सहस्रशः **काः** भूमौ पतन्ति? (iv) अरुणाचलप्रदेशे अनेके **के** मान्यन्ते? (v) **कुत्र / कासु** विचरन् राजा अचिन्तयत्?	5×1=5

16.अ आ	अन्वयपूर्तिः अन्वयः - शुश्रूषा **(i) श्रवणम्** च एव, ग्रहणम् तथा **(ii) धारणम्**, ऊह-अपोह-अर्थविज्ञानम्, (iii) **तत्त्वज्ञानम्** च **(iv) धीगुणाः** (सन्ति)। **अथवा** भावार्थपूर्तिः भावार्थः - हे महाबाहो! अत्र संशयः नास्ति यत् एतत् (i) **मनः** अतीव चञ्चलम् अस्ति। इदं (ii) **बहुकष्टेन** नियन्त्रितं भवति परन्तु यदि वयं पुनः पुनः (iii) **अभ्यासं** कुर्मः, विरक्ताः च भवामः तदा निश्चयेन एतत् वशीकर्तुं (iv) **शक्नुमः**।	4×½=2
17.	प्रसङ्गानुकूलम् उचितार्थचयनम् (i) (ग) उद्गमस्थलम् (ii) (घ) स्थगितः (iii) (ख) चतुर्थांशम् (iv) (क) खिन्नाः	4×1=4
18.	पठितकथा-पूर्तिः - कस्मिंञ्चित् नगरे चन्द्रः (i) **नामकः** एकः भूपतिः अवसत्। तस्य पुत्राः वानरक्रीडारताः प्रतिदिनं वानरसमूहं (ii) **विविधैः** भोज्यपदार्थैः सन्तुष्टं कुर्वन्ति स्म। तत्रैव राजगृहे बालवाहनयोग्यं मेषयूथमपि (iii) **आसीत्**। तत्र एकः मेषः जिह्वायाः लोलुपतावशात् अहर्निशं महानसं प्रविश्य तत्र यद् वस्तु पश्यति तदेव (iv) **खादति** स्म ततः पाचकाः यत्किञ्चित् काष्ठं मृत्तिकापात्रं कांस्यपात्रं ताम्रपात्रं वा पश्यन्ति स्म, तेन एव शीघ्रं ताडयन्ति स्म। मेषस्य सूपकाराणां च (v) **कलहं** दृष्ट्वा बुद्धिमान् वानरयूथपतिः अचिन्तयत्- "एतेषां कलहो (vi) **वानराणां** हिताय नास्ति।" एवं चिन्तयित्वा सः सर्वान् वानरान् आहूय एकान्ते अवदत्- (vii) **भोः बान्धवाः!** प्रतिदिनं मेषेण सह सूपकाराणाम् अयं कलहः नूनम् अस्माकं विनाशस्य कारणं भविष्यति अतः वयत् एतत् (viii) **राजभवनं** त्यक्त्वा वनं गच्छामः। तस्य इमं परामर्शम् अश्रद्धेयं मत्वा रसनास्वादलुब्धाः वानराः गन्तुं सिद्धाः न अभवन्।	8×½=4

----------0000----------

आदर्श-प्रश्नपत्रम् - 2024-25

कक्षा - दशमी

संस्कृतम् (सम्प्रेषणात्मकम्) (कोड-सङ्ख्या - 119)

समयः - 3 होराः **पूर्णाङ्काः - 80**

सामान्यनिर्देशाः –

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति।
4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

प्रश्नपत्रस्वरूपम् -

'क' भागः	**:**	**अपठितावबोधनम्**	**10 अङ्काः**
'ख' भागः	**:**	**रचनात्मककार्यम्**	**15 अङ्काः**
'ग' भागः	**:**	**अनुप्रयुक्तव्याकरणम्**	**25 अङ्काः**
'घ' भागः	**:**	**पठितावबोधनम्**	**30 अङ्काः**

'क' भागः

अपठितावबोधनम् (10 अङ्काः)

1.	अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – प्रकृतिः अस्माकं सर्वेषां जननी अस्ति। एषा स्वप्राकृतिकसंसाधनैः व्यवस्थाभिः च अस्मान् पोषयति पालयति रक्षति च। यदा एतानि संसाधनानि नष्टानि प्रदूषितानि वा भवन्ति प्राकृतिक-व्यवस्था च भङ्गा भवति तदा जीवनाय सङ्कटः उत्पद्यते। अद्यत्वे अस्माकं पर्यावरणस्य प्रदूषणं निरन्तरं वर्धमानम् अस्ति। अद्य पर्यावरण-प्रदूषणं संसारस्य भीषणतमा समस्या अस्ति। प्राचीनकाले यद्यपि पर्यावरणस्य प्रदूषणस्य समस्या नासीत् तथापि वेदेषु स्थाने-स्थाने ऋषीणां पर्यावरण-विषयकं चिन्तनं दृश्यते। स्वच्छं पर्यावरणम् अस्माकं जीवनस्य आधारः अस्ति। पर्यावरणस्य आधाराः	10

	पुष्पिताः, पल्लविताः वृक्षाः भवन्ति। वृक्षाः पर्यावरणं सन्तुलितं शुद्धं च कुर्वन्ति। वृक्षाः भूमेः जलं गृह्णन्ति। वृक्षाणाम् इदं जलं मेघानां निर्माणे सहायकं भवति। इत्थं वृक्षाः वर्षायै सहायकाः भवन्ति। वृक्षाः पुष्पाणां, फलानाम् औषधीनां च स्रोताः सन्ति। ते अस्मभ्यं सर्वम् अर्पयन्ति। वृक्षाः रोपणीयाः इति उद्घोषयन्तः अपि वयं प्रतिदिनं तेषां कर्तनं पश्यामः इत्यस्ति चिन्तनीयः विषयः। अस्माभिः न विस्मरणीयं यत् **वृक्षाः सत्पुरुषा इव**। **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** 1×2=2 (i) अद्य संसारस्य भीषणतमा समस्या का अस्ति? (ii) वृक्षाः कुतः जलं गृह्णन्ति? (iii) के अस्मभ्यं सर्वम् अर्पयन्ति? **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 2×2=4 (i) पर्यावरणस्य आधाराः के भवन्ति? (ii) वृक्षाः केषाम् स्रोताः सन्ति? (iii) वृक्षाः कथं वर्षायै सहायकाः भवन्ति? **इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** 1 **ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** 1×3=3 (i) 'प्राचीनकाले यद्यपि पर्यावरणप्रदूषणस्य समस्या नासीत्' अत्र 'आसीत्' क्रियापदस्य कर्तृपदं किम्? (क) प्राचीनकाले (ख) यद्यपि (ग) समस्या (घ) पर्यावरणप्रदूषणस्य (ii) 'वयं प्रतिदिनं तेषां कर्तनं पश्यामः' अत्र क्रियापदं किम् अस्ति? (क) कर्तनम् (ख) तेषाम् (ग) प्रतिदिनं (घ) पश्यामः (iii) 'पर्यावरणम्' इति पदस्य किं विशेषणपदम्? (क) वृक्षम् (ख) स्वच्छम् (ग) जलम् (घ) प्रदूषणम् (iv) 'तरवः' इति पदस्य पर्यायपदं चिनुत। (क) वृक्षाः (ख) आगाराः (ग) सहायकाः (घ) पुष्पिताः	

'ख' भागः

रचनात्मकं कार्यम् (15 अङ्काः)

2.	**भवतः नाम तनिष्कः। भवतः विद्यालये संस्कृतनाटकस्य मञ्चनम् अभवत्। तदर्थं मित्रं दीपकम् प्रति लिखितं पत्रं मञ्जूषातः पदानां सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत -** आदर्शविद्यालयः, (i) ----------	½×10=5

दिनाङ्कः ----------

प्रियमित्र (ii) ----------

(iii) ----------।

अत्र सर्वगतं कुशलम्। आशासे त्वम् अपि कुशली। यथा त्वं जानासि गत सप्ताहे मम विद्यालये संस्कृत-उत्सवः सम्पन्नः। अस्मिन् उत्सवे संस्कृतपरिषदः (iv) ---------- पाठ्यपुस्तकस्य 'कवयामि वयामि यामि' इति नाटकस्य (v) --------- अकुर्वन्। तस्मिन् नाटके मया 'भोजस्य' अभिनयः कृतः। कुविन्दस्य अभिनयं मम मित्रं प्राञ्जलः अकरोत्। तस्य मुखात् श्लोकगायनं (vi) ---------- सर्वेऽपि उपस्थिताः दर्शकाः भावविभोराः जाताः करतलध्वनिभिः च तस्य उत्साहवर्धनम् (vii) ----------। कार्यक्रमस्य अन्तेऽपि मुख्यातिथिमहोदयेन संस्कृतनाटकस्य भूरि भूरि (viii) --------- कृता। वस्तुतः अयम् उत्सवः मनोरञ्जकं ज्ञानवर्धकं च आसीत्।

तव विद्यालये संस्कृतोत्सवः कदा भविष्यति इति अवश्यं सूचय। मातृपितृचरणेषु (ix) ---------- प्रणामाः।

तव मित्रम्

(x) ----------

मञ्जूषा

प्रशंसा, कृतवन्तः, श्रुत्वा, दिल्लीतः, मम, तनिष्कः, दीपक!, छात्राः, सस्नेहं नमः, मञ्चनम्।

3. **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –** **1×5=5**



मञ्जूषा

तरन्ति, स्वच्छम्, ग्रीष्मकाले, तरणतालस्य, जनाः, बालाः, कुर्वन्ति, प्रसन्नाः, जलक्रीडाम्, जलम्, कन्दुकम्, सन्ति।

	अथवा **मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –** **"अनुशासनस्य महत्त्वम्"** **मञ्जूषा** साफल्यम्, जनयति, परिश्रमेण सह, आलस्यम्, प्राप्नोति, स्वस्थम्, दिनचर्या, आत्मविश्वासः,जीवनम्, स्वलक्ष्यम्, आवश्यकम्, आत्मानम्, दुर्गुणेभ्यः।	1×5=5
4.	**मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-** **पुत्रः** - तात! प्रणमामि। **पिता** – (i) ---------- **पुत्रः** - आम् तात! सर्वं कुशलम् अस्ति। **पिता** - उत्तमम्। विद्यालये तव अध्ययनं कथं प्रचलति, कापि समस्या तु नास्ति? **पुत्रः** - न, कापि समस्या नास्ति परन्तु एकत्र भवताम् अनुमतिं सहाय्यं च इच्छामि। **पिता** - कस्मिन् सन्दर्भे, निस्सङ्कोचं वद। **पुत्रः** – श्वः मम प्रियशिक्षकस्य जन्मोत्सवः भविष्यति। (ii) अहम् ----------। **पिता** - शिक्षक तु सदैव पूज्यः। तस्मिन् सन्दर्भे सङ्कोचः न कर्तव्यः। (iii) ---------- **पुत्रः** - अहं पूर्वमेव पृष्टवान्, कार्यक्रमः सायं सप्तवादने भविष्यति। केवलं भवतां समयस्य आशङ्का आसीत्। **पिता** - चतुर! सर्वं निश्चित्य मां पृच्छसि। (iv) ----------। **पुत्रः** - तात! किमपि उपायनं स्वीकरणीयम् अस्ति। **पिता** - अस्तु! मात्रा सह आपणं गत्वा उत्तमम् उपायनं स्वीकुरु। **पुत्रः** - (v) ----------। **मञ्जूषा** (i) अस्तु,अहं कार्यालयात् समयेन आगमिष्यामि। (ii) अस्तु, धन्यवादः। (iii) शिक्षकं पृच्छ, कदा कार्यक्रमः भविष्यति? (iv) तत्र भवता सह गन्तुम् इच्छामि। (v) चिरञ्जीव! वद सर्वं कुशलम्?	1×5=5
	अथवा **मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत-** एकदा एका चटका आसीत्। सा वनस्य एकस्मिन् उन्नतवृक्षे (i) ---------- वसति स्म। एकदा वने (ii) ------- वृष्टिः अभवत्। तदा पीडितः एकः वानरः (iii) ---------- तत्वृक्षस्य अधः आगच्छत्।	½×10=5

	वानरं दृष्ट्वा (iv) -------- अवदत् - "भोः वानर! भवान् किमर्थं व्यर्थमेव दुःखी भवति? (v) ----- -शरीरं मनुष्य-शरीरम् (vi) ---------- अस्ति। हस्तौ पादौ च सम्यक् सन्ति। भवान् उत्तम-गृहस्य (vii) ---------- किमर्थं न करोति?" तत् श्रुत्वा वानरः कुपितः अभवत्। वानरः (viii) --------- -चटकाम् अवदत्- "किमर्थं भवती तूष्णीं न (ix) ----------? किमर्थं मम उपहासं करोति?" इति उक्त्वा सः वानरः (x) ---------- आरोहत् चटकायाः च नीडम् अनाशयत्। अतः कथ्यते- मूर्खेभ्यः सदुपदेशाः न हिताय। **मञ्जूषा** निर्माणम्, चटका, भवतः, स्वनीडे, महती, आश्रयार्थम्, इव, तिष्ठति, वृक्षम्, कोपेन।	
	'ग' भागः **अनुप्रयुक्तव्याकरणम्** **(25 अङ्काः)**	
5.	अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्) (i) केन **प्रयुक्तः + अयं** पापं चरति पुरुषः। (ii) **नैतत्** मनुष्येषु प्रयोक्तव्यम्। (iii) आसीत् प्रच्छन्नभाग्यः **कश्चित्** कुमारः। (iv) **पापिनाञ्च** सदा दुःखम्। (v) अत्र **संस्कृत +छात्राः** पठन्ति।	1×4=4
6.	अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) (i) **सर्वदा** शारदा अस्माकं वदनाम्बुजे सन्निधिं कुर्यात्। (क) सर्वेभ्यः ददाति इति (ख) सर्वं ददाति इति (ग) सर्वैः दीयते (घ) सर्वं आददाति इति (ii) **युधिष्ठिरार्जुनौ** रथारोहणं नाटयतः। (क) युधिष्ठिरः अर्जुनः द्वौ (ख) युधिष्ठिरः अर्जुनौ च (ग) युधिष्ठिरः च अर्जुनः च (घ) युधिष्ठिरौ अर्जुनौ च (iii) अरुणाचले अनेकानि **पर्यटनाय स्थलानि** सन्ति। (क) पर्यटनस्थलाः (ख) पर्यटनस्थलम् (ग) पर्यटनास्थलानि (घ) पर्यटनस्थलानि (iv) सः अपि तत् नेत्रं **स्थानम् अनतिक्रम्य** अस्थापयत्। (क) यथास्थानम् (ख) अनुस्थानम् (ग) प्रतिस्थानम् (घ) उपस्थानम्	1×4=4

	(v) को भेदः **<u>पिकस्य च काकस्य च</u>**? (क) पिककाकस्य (ख) पिककाकानाम् (ग) पिककाकयोः (घ) पिककाकौ	
7.	अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) (i) देहल्याम् अनेकानि **<u>ऐतिहासिकानि</u>** स्थलानि सन्ति। (क) इतिहास+मतुप् (ख) इतिहास+ठक् (ग) इतिहास+ङीप् (घ) इतिहास+टाप् (ii) अधुना **<u>रमणीय+टाप्</u>** हि सृष्टिः एषा। (क) रमणी (ख) रमणीयता (ग) रमणीयः (घ) रमणीया (iii) केचन **<u>पञ्चत्वं</u>** गताः। (क) पञ्च+त्व (ख) पञ्च+त्वम् (ग) पञ्च+तल् (घ) पञ्च+टाप् (iv) विद्वांसः एव लोकेऽस्मिन् **<u>चक्षुस् + मतुप्</u>** प्रकीर्तिताः। (क) चक्षुस्मन्तः (ख) चक्षुष्मान् (ग) चक्षुष्मन्तः (घ) चक्षुस्मतुप् (v) व्यवहारे सदा **<u>सरल+तल्</u>** भवेत्। (क) सरलता (ख) सरलत्वम् (ग) सरला (घ) सरलतायाः	1×4=4
8.	वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत – (केवलं प्रश्नत्रयम्) **वेदांशी**– कपिल! (i) ---------- कस्यां कक्षायां पठ्यते? **कपिलः** – अहम् अष्टमी-कक्षायां पठामि। **वेदांशी** – तव विद्यालये छात्रैः सर्वप्रथमं किं (ii) ----------? **कपिलः** – सर्वप्रथमं छात्राः (iii) ---------- कुर्वन्ति। अधुना त्वया किं क्रियते? **वेदांशी** – अधुना (iv) ---------- विडियो-क्रीडां क्रीडामि। **कपिलः** - एतत् उचितं न अस्ति। अधुना परीक्षाकालः अस्ति अतः त्वया पठनीयम्। मञ्जूषा प्रार्थनाम्, त्वया, अहम्, क्रियते।	1×3=3

9.	कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नत्रयम्) (i) कृषकः जगदीशः प्रातः --------- (7:30) वादने क्षेत्रं गच्छति। (ii) तत्र ---------- (12:15) वादनपर्यन्तं सः शस्यं सिञ्चति। (iii) मध्याह्ने ---------- (1:00) वादने सः विश्रामं करोति। (iv) ---------- (2:45) वादने सः पुनः कृषिकार्येषु संलग्नः भवति।	1×3=3
10.	मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्) (i) कदापि ..... कार्यं न करणीयम्।। (ii) -------- विषादं त्यक्त्वा उद्यमः क्रियताम्। (iii) एषः कलहः ---------- भवतां विनाशकारणं भविष्यति। (iv) अवक्रता यथा चित्ते ..... वाचि भवेत्। (v) अर्थिनः ..... धनलाभमात्रेण सन्तोषं भजन्ते। मञ्जूषा - तु, नूनम्, तथा, सहसा, इदानीम्	1×4=4
11.	अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्) (i) कपयः प्रहस्य **अवदत्**। (क) अवदत (ख) अवदताम् (ग) अवदन् (घ) अवदः (ii) **कीदृशः** तव मैत्री? (क) कीदृशं (ख) कीदृशी (ग) कीदृशीः (घ) कीदृशाः (iii) **त्वं** द्रौणेः चपलां प्रकृतिं न जानाति। (क) भवन्तः (ख) वयम् (ग) भवान् (घ) युवाम् (iv) श्वः त्वं किं **करोषि**? (क) करिष्यसि (ख) अकरोत् (ग) अकरोः (घ) करिष्यति	1×3=3
	'घ' भागः **पठितावबोधनम्** (30 अङ्काः)	
12.	अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –	5

	कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत्- मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत्-हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारा-मण्डलभूषितं जगत् एतत् कथमिव पश्येयं चक्षुर्हीनः! राजा उवाच– भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम्, किं करवाणि? विप्रः उवाच - यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत्, "लोके चक्षुर्दानं दुष्करमेव"। **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** (i) अर्थिनः केन सन्तुष्टाः आसन्? (ii) लोके किम् दुष्करम् अस्ति? (iii) चक्षुषा विप्रस्य का निर्बाधा भवेत्? **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा राज्ञः पुरतः किमवदत्? (ii) शक्रः किं परीक्षितुम् आगतः? (iii) विप्रः किमर्थं चक्षुषः दानम् इच्छति स्म? **इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)** (i) 'श्रुत्वा' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्? (ii) 'अर्थिनः' इत्यस्य क्रियापदं किं प्रयुक्तम्? (iii) 'ईदृशं दानम्' अत्र विशेष्यपदं किम्?	 ½×2=1 1×2=2 1×2=2
13.	**अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** **असंशयं महाबाहो मनो दुर्निग्रहं चलम्।** **अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥** **कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।** **कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् ॥** **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) मनुष्याणां यशः कीदृशः भवति? (ii) कुवाक्यान्तं किं भवति? (iii) कलहेन कानि नश्यन्ति? **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) मनः कीदृशं भवति? (ii) मनः कथं गृह्यते? (iii) कुराजान्तानि कानि भवन्ति?	5 ½×2=1 1×2=2

	इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) (i) 'मित्रता' इत्यस्य किं पर्यायपदं प्रयुक्तम्? (ii) 'चलम्' इत्यस्य विशेष्यपदं चित्वा लिखत। (iii) अत्र पद्ययोः क्रियापदं किम् अस्ति?	1×2=2
14.	अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –	5
	(ततः पुत्रशोकसन्तप्ताः युधिष्ठिरः भीमः द्रौपदी च रणभूमौ प्रविशन्ति।) **द्रौपदी -** (दीर्घं निःश्वस्य) हा हन्त। किम् इदं घोरम् आपतितम्। पापकर्मणा द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः। **युधिष्ठिरः -** शुभे! धैर्यं धारय। नूनं तव पुत्राः वीरगतिम् एव प्राप्ताः। वीरजननी त्वं शोचितुं न अर्हसि। **द्रौपदी -** कथं मन्दभाग्या अहं धैर्यं धारयामि। यावत् असौ क्रूरकर्मा न दण्ड्यते, तावत् अहम् इतः न गमिष्यामि, अत्रैव प्राणत्यागं च करिष्यामि। **युधिष्ठिरः -** प्रिये! मा एवं ब्रूयाः। स पापकर्मा कुत्र गतः इति न जानीमः। अतिदूरं किञ्चिद् दुर्गमवनं प्रविष्टः भवेत्। **द्रौपदी -** (भीमं प्रति) आर्यपुत्र! क्षत्रधर्मम् अनुस्मरन् मां शोकसागरात् रक्ष। अस्मिन् संसारे कश्चित् अपि त्वया सदृशः पराक्रमी नास्ति। पुरा वारणावते त्वमेव पाण्डवान् रक्षितवान्। विराट-नगरे अपि त्वं मां प्राणसङ्कटात् उद्धृतवान्। **भीमः -** (युधिष्ठिरं प्रति) भ्रातः! द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं ददातु भवान्। **युधिष्ठिरः -** गच्छ वत्स! विजयी भव, नकुलः तव सारथिः भवतु। (भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति।)	
	अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (i) का आत्मानं मन्दभाग्या इति कथयति? (ii) पुरा कुत्र भीमः पाण्डवान् रक्षितवान्? (iii) युधिष्ठिरः भीमः द्रौपदी कुत्र प्रविशन्ति?	½×2=1
	आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (i) द्रौपदी दीर्घं निःश्वस्य किं कथयति? (ii) भीमः कदा पाण्डवान् रक्षितवान्? (iii) भीमः किमर्थम् अनुमतिम् इच्छति?	1×2=2
	इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) (i) 'निर्गच्छति' इत्यस्य किं विपर्यय-पदम् अत्र प्रयुक्तम्? (ii) 'श्रीकृष्णः अर्जुनेन सह प्रविशति।' अत्र कर्तृपदं किम् प्रयुक्तम्?	1×2=2

	(iii) 'घोरम् आपतितम्' अनयोः पदयोः विशेषणपदं किम्?	
15.	रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः) (i) **अरुणाचलप्रदेशे** पञ्चाशदधिकाः नद्यः प्रवहन्ति। (ii) चपलबालकेभ्यः **भीषणानाम्** अस्त्राणां प्रदानं न उचितम्। (iii) मनसः नियन्त्रणं **वायोः** इव सुदुष्करम् मन्यते। (iv) मेषः दाहवेदनया **भूमौ** लुठति। (v) शिष्यः एकचतुर्थांशं **स्वमेधया** आदत्ते। (vi) राजहंसः **वर्षर्तौ** मानसं पलायते।	1×5=5
16.	मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत – **न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।** **प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी॥** **अन्वयः-** यथा मधुरभाषिणी (i) --------- पुरुषम् प्रह्लादयति (ii) --------- शीतलसलिलम् न चन्दनरसः न (iii) ---------- छाया च (iv) ---------- (प्रह्लादयति)। मञ्जूषा शीतला, वाणी, न, तथा। अथवा मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत - य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च। न कुर्यादहितं कर्म स परेभ्यः कदापि च॥ **भावार्थः-** यदि कश्चित् (i) ---------- स्वस्य कल्याणं (ii) ---------- जीवनम् च इच्छति तर्हि सः (iii) ---------- परेभ्यः अहितं कर्म न (iv) ----------। अर्थात् यथा व्यवहारं सः अन्यैः सह करिष्यति तथा एव अन्ये तेन सह व्यवहरिष्यन्ति। मञ्जूषा सुखमयम्, कुर्यात्, जनः, कदापि।	½×4=2 ½×4=2
17.	अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्) (i) **शैलानां** पारं द्रष्टुं समर्थः भव। (क) नदीनाम् (ख) वृक्षाणाम् (ग) पर्वतानाम् (घ) मेघानाम् (ii) भवता **साधु** उक्तम्। (क) संन्यासी (ख) शुद्धम् (ग) अनुचितम् (घ) सम्यक्	1×4=4

	(iii) सर्वदा शारदा अस्माकं **<u>वदने</u>** सन्निधिं क्रियात्। (क) गृहे (ख) वने (ग) मुखे (घ) सर्वत्र (iv) यूथपः **<u>रहसि</u>** अवदत्। (क) रहस्यम् (ख) एकान्ते (ग) उच्चैः (घ) मनसि (v) स विवेकः इति **<u>ईरितः</u>**। (क) कथितः (ख) श्रुतः (ग) लिखितः (घ) दृष्टः	
18.	**मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत –** चन्द्रनामकस्य राजपुत्राः राजगृहे वानरान् पालयन्ति स्म। तस्मिन् राजगृहे (i) ---------- एकं मेषयूथम् अपि आसीत्। तेषु एकः उद्दण्डः मेषः अहर्निशं (ii) ---------- प्रविश्य यत् पश्यति स्म तत् खादति स्म। अतः तेन सह सूपकाराणां कलहः भवति स्म। मेषस्य सूपकाराणां च कलहं दृष्ट्वा वानराणां बुद्धिमान् यूथपतिः तान् अवदत्- एतेषां कलहो वानराणां विनाशकारणं भविष्यति अतः (iii) ---------- राजभवनं त्यक्त्वा वनं गच्छाम। किन्तु (iv) ---------- वानराः तस्य वचनम् अश्रद्धेयं मत्वा वनं न अगच्छन्। एकदा सः उद्दण्डः (v) ---------- सूपकारैः ज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्राविशत्। तेन अश्वशालायाम् अपि अग्निज्वालाः समुत्थिताः। अतः केचित् अश्वाः दग्धाः केचित् च (vi) ----------। राजवैद्यः नृपम् अवदत् यत् अश्वानां वह्निदाहसमुद्भवः दोषः (vii) ---------- मेदसा नाशमभ्येति। राजा आदिशत्- यथोचितं क्रियताम्। राजादेशं श्रुत्वा भयत्रस्ताः (viii) ---------- अचिन्तयन्- अवधीरिताः अस्माभिः गुरुजनोपदेशाः। **मञ्जूषा** मृताः, मेषः, वानराः, बालवाहनयोग्यम्, मदोद्धताः, वयम्, वानराणाम्, महानसम्।	½×8=4

----------0000----------

आदर्शप्रश्नपत्रम् 2024-25

कक्षा - दशमी

संस्कृतम् (कोड संख्या - 119)

समयः होरात्रयम् **अङ्कयोजना उत्तरसङ्केताश्च** **पूर्णाङ्काः 80**

अवधातव्यम् -

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः नवम्यां कक्षायाम् अपि पालनीयः।)**
3. गद्यांशे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

	भागः 'क' अपठितावबोधनम्	
1	**गद्यांशः** **अ एकपदेन उत्तरत –** **(केवलं प्रश्नद्वयम्)** (i) पर्यावरण-प्रदूषणम् (ii) भूमेः (iii) वृक्षाः **आ पूर्णवाक्येन लिखत -** **(केवलं प्रश्नद्वयम्)** (i) पर्यावरणस्य आधाराः पुष्पिताः, पल्लविताः वृक्षाः भवन्ति। (ii) वृक्षाः पुष्पाणां फलानाम्, औषधीनां च आगाराः सन्ति। (iii) वृक्षाणाम् जलं मेघानां निर्माणे सहायकं भवति इत्थं वृक्षाः वर्षायै सहायकाः भवन्ति।	1×2=2 2×2=4

	इ अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत – पर्यावरणम् / वृक्षाः /वृक्षाणां महत्त्वम्/ प्रकृतिसंरक्षणम्/वृक्षाः सत्पुरुषा इव छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः । **ई यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्)** (i) (ग) समस्या (ii) (घ) पश्यामः (iii) (ख) स्वच्छम् (iv) (क) वृक्षाः	1 1×3=3
	भागः 'ख' रचनात्मकं कार्यम्	
2.	**पत्रलेखनम्** **भवतः नाम तनिष्कः । भवतः विद्यालये संस्कृतनाटकस्य मञ्चनम् अभवत् । तदर्थं मित्रं दीपकम् प्रति लिखितं पत्रं मञ्जूषातः पदानां सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत -** आदर्शविद्यालयः, **(i) दिल्लीतः** दिनाङ्कः ---------- प्रियमित्र **(ii) दीपक!** **(iii) सस्नेहं नमः ।** अत्र सर्वगतं कुशलम् । आशासे त्वम् अपि कुशली । यथा त्वम् जानासि गत सप्ताहे मम विद्यालये संस्कृत-उत्सवः सम्पन्नः । अस्मिन् उत्सवे संस्कृतपरिषदः **(iv) छात्राः** पाठ्यपुस्तकस्य 'कवयामि वयामि यामि' इति नाटकस्य **(v) मञ्चनम्** अकुर्वन् । तस्मिन् नाटके मया 'भोजस्य' अभिनयः कृतः । कुविन्दस्य अभिनयं मम मित्रं प्राञ्जलः अकरोत् । तस्य मुखात् श्लोकगायनं **(vi) श्रुत्वा** सर्वेऽपि उपस्थिताः दर्शकाः भावविभोराः जाताः करतलध्वनिभिः च तस्य उत्साहवर्धनम् **(vii) कृतवन्तः** । कार्यक्रमस्य अन्तेऽपि मुख्यातिथिमहोदयेन संस्कृतनाटकस्य भूरि भूरि **(viii) प्रशंसा** कृता । वस्तुतः अयम् उत्सवः मनोरञ्जकं ज्ञानवर्धकं च आसीत् । तव विद्यालये संस्कृतोत्सवः कदा भविष्यति इति अवश्यं सूचय । मातृपितृचरणेषु **(ix) मम** प्रणामाः । तव मित्रम् **(x) तनिष्कः**	½×10=5

3.	**चित्रवर्णनम्** अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते। **अथवा** **अनुच्छेदलेखनम्** अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः।	1×5=5 1×5=5
4.	**संवादपूर्तिः** **पुत्रः** - तात! प्रणमामि। **पिता – (i) चिरञ्जीव ! वद सर्वं कुशलम् ?** **पुत्रः** - आम् तात! सर्वं कुशलम् अस्ति। **पिता** - उत्तमम्। विद्यालये तव अध्ययनं कथं प्रचलति, कापि समस्या तु नास्ति ? **पुत्रः** - न, कापि समस्या नास्ति परन्तु एकत्र भवताम् अनुमतिं सहाय्यं च इच्छामि। **पिता** - कस्मिन् सन्दर्भे , निस्सङ्कोचं वद। **पुत्रः** – श्वः मम प्रियशिक्षकस्य जन्मोत्सवः भविष्यति। अहम् **(ii) तत्र भवता सह गन्तुम् इच्छामि**। **पिता** - शिक्षक तु सदैव पूज्यः। तस्मिन् सन्दर्भे सङ्कोचः न कर्तव्यः। **(iii) शिक्षकं पृच्छ, कदा कार्यक्रमः भविष्यति?** **पुत्रः** - अहं पूर्वमेव पृष्टवान्, कार्यक्रमः सायं सप्तवादने भविष्यति। केवलं भवतां समयस्य आशङ्का आसीत्। **पिता** - चतुर! सर्वं निश्चित्य मां पृच्छसि। **(iv) अस्तु, अहं कार्यालयात् समयेन आगमिष्यामि।** **पुत्रः** - तात! किमपि उपायनं स्वीकरणीयम् अस्ति। **पिता** - अस्तु! मात्रा सह आपणं गत्वा उत्तमम् उपायनं स्वीकुरु। **पुत्रः** - **(v) अस्तु, धन्यवादः**। **अथवा**	1×5=5

	कथापूर्तिः एकदा एका चटका आसीत्। सा वनस्य एकस्मिन् उन्नतवृक्षे **(i) स्वनीडे** वसति स्म । एकदा वने **(ii) महती** वृष्टिः अभवत्। तदा पीडितः एकः वानरः **(iii) आश्रयार्थम्** तत्वृक्षस्य अधः आगच्छत् । वानरं दृष्ट्वा **(iv) चटका** अवदत् - "भोः वानर! भवान् किमर्थं व्यर्थमेव दुःखी भवति ? **(v) भवतः** शरीरं मनुष्य-शरीरम् **(vi) इव** अस्ति । हस्तौ पादौ च सम्यक् सन्ति । भवान् उत्तम-गृहस्य **(vii) निर्माणम्** किमर्थं न करोति ?" तत् श्रुत्वा वानरः कुपितः अभवत्। वानरः **(viii) कोपेन** चटकाम् अवदत्- "किमर्थं भवती तूष्णीं न **(ix) तिष्ठति** ? किमर्थं मम उपहासं करोति ?" इति उक्त्वा सः वानरः **(x) वृक्षम्** आरोहत् चटकायाः च नीडम् अनाशयत्। अतः कथ्यते- मूर्खेभ्यः सदुपदेशाः न हिताय।	½×10=5
	भागः 'ग' अनुप्रयुक्तव्याकरणम्	
5	**सन्धिः सन्धिच्छेदश्च (केवलं प्रश्नचतुष्टयम्)** (i) प्रयुक्तोऽयम् (ii) न + एतत् (iii) कः + चिद् (iv) पापिनां + च (v) संस्कृतच्छात्राः	1×4=4
6	**समस्तपदं विग्रहः च (केवलं प्रश्नचतुष्टयम्)** (i) (ख) सर्वं ददाति इति (ii) (ग) युधिष्ठिरः च अर्जुनः च (iii) (घ) पर्यटनस्थलानि (iv) (क) यथास्थानम् (v) (ग) पिककाकयोः	1×4=4
7.	**प्रत्ययाः (केवलं प्रश्नचतुष्टयम्)** (i) (ख) इतिहास+ठक् (ii) (घ) रमणीया (iii) (क) पञ्च + त्व (iv) (ग) चक्षुष्मन्तः (v) (क) सरलता	1×4=4

8	**वाच्यम् (केवलं प्रश्नत्रयम्)** (i) त्वया (ii) क्रियते (iii) प्रार्थनाम् (iv) अहम्	1×3=3
9	**समयः (केवलं प्रश्नत्रयम्)** (i) सार्ध-सप्तवादने (ii) सपाद-द्वादशवादने (iii) एक -वादने (iv) पादोन-त्रिवादने	1×3=3
10	**अव्ययपदानि (केवलं प्रश्नचतुष्टयम्)** (i) सहसा (ii) इदानीम् (iii) नूनम् (iv) तथा (v) तु	1×4=4
11	**अशुद्धसंशोधनम् (केवलं प्रश्नत्रयम्)** (i) (ग) अवदन् (ii) (ख) कीदृशी (iii) (ग) भवान् (iv) (क) करिष्यसि	1×3=3
	भागः 'घ' पठितावबोधनम्	
12.	**गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** **अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** (i) धनलाभमात्रेण (ii) चक्षुर्दानम् (iii) लोकयात्रा	5 ½×2=1

	आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) (i) शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा राज्ञः पुरतः अवदत्- हे राजन् ! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारा-मण्डलभूषितं जगत् एतत् कथमिव पश्येयं चक्षुर्हीनः ! (ii) शक्रः राज्ञः दानशीलतां परीक्षितुम् आगतः। (iii) विप्रः स्वलोकयात्रां निर्बाधं कर्तुं चक्षुषः दानम् इच्छति स्म। अथवा विप्रः रवि-शशि-तारा-मण्डलभूषितं जगत् द्रष्टुं चक्षुषः दानम् इच्छति स्म। **इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** (i) आकर्ण्य (ii) भजन्ते (iii) दानम्	1×2=2 1×2=2
13.	**पद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) कुकर्मान्तम् (ii) सौहृदम् (iii) हर्म्याणि **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) मनः चलं दुर्निग्रहं च अस्ति। (ii) मनः अभ्यासेन वैराग्येण च गृह्यते। (iii) कुराजान्तानि राष्ट्राणि भवन्ति। **इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** (i) सौहृदम् (ii) मनः (iii) गृह्यते	5 ½×2=1 1×2=2 1×2=2
14.	**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** (i) द्रौपदी (ii) वारणावते (iii) रणभूमौ **आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** (i) द्रौपदी दीर्घं निःश्वस्य कथयति- हा हन्त। किम् इदं घोरम् आपतितम्, पापकर्मणा	5 ½×2=1 1×2=2

	द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः। (ii) भीमः वारणावते पाण्डवान् रक्षितवान् । (iii) भीमः द्रौणिम् अनुगन्तुम् अनुमतिम् इच्छति । **इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** (i) प्रविशति (ii) श्रीकृष्णः (iii) घोरम्	1×2=2
15.	**प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः)** (i) **कुत्र** पञ्चाशदधिकाः नद्यः प्रवहन्ति ? (ii) चपलबालकेभ्यः **कीदृशाणानाम्** अस्त्राणां प्रदानं न उचितम् ? (iii) मनसः नियन्त्रणं कस्य इव सुदुष्करम् मन्यते ? (iv) मेषः दाहवेदनया **कुत्र/कस्यां** लुठति ? (v) शिष्यः एकचतुर्थांशं **कया** आदत्ते ? (vi) राजहंसः **कदा** मानसं पलायते ?	1×5=5
16.	**अन्वयपूर्तिः** **अन्वयः**- यथा मधुरभाषिणी **(i) वाणी** पुरुषम् प्रह्लादयति **(ii) तथा** शीतलसलिलम् न चन्दनरसः न **(iii) शीतला** छाया च **(iv) न** (प्रह्लादयति)। **अथवा** **भावार्थे रिक्तस्थानपूर्तिः** यदि कश्चित् **(i) जनः** स्वस्य कल्याणं **(ii) सुखमयम्** जीवनम् च इच्छति तर्हि सः **(iii) कदापि** परेभ्यः अहितं कर्म न **(iv) कुर्यात्** । अर्थात् यथा व्यवहारं सः अन्यैः सह करिष्यति तथा एव अन्ये तेन सह व्यवहरिष्यन्ति।	½×4=2 ½×4=2
17.	**प्रसङ्गानुकूलम् उचितार्थम् (केवलं प्रश्नचतुष्टयम्)** (i) (ग) पर्वतानाम् (ii) (घ) सम्यक् (iii) (ग) मुखे (iv) (ख) एकान्ते (v) (क) कथितः	1×4=4

18.	**पठितकथा-पूर्तिः–** चन्द्रनामकस्य राजपुत्राः राजगृहे वानरान् पालयन्ति स्म। तस्मिन् राजगृहे (i) **बालवाहन-योग्यम्** एकं मेषयूथम् अपि आसीत्। तेषु एकः उद्दण्डः मेषः अहर्निशं (ii) **महानसम्** प्रविश्य यत् पश्यति स्म तत् खादति स्म। अतः तेन सह सूपकाराणां कलहः भवति स्म। मेषस्य सूपकाराणां च कलहं दृष्ट्वा वानराणां बुद्धिमान् यूथपतिः तान् अवदत्- एतेषां कलहो वानराणां विनाशकारणं भविष्यति अतः (iii) **वयम्** राजभवनं त्यक्त्वा वनं गच्छाम। किन्तु (iv) **मदोद्धताः** वानराः तस्य वचनम् अश्रद्धेयं मत्वा वनं न अगच्छन्। एकदा सः उद्दण्डः (v) **मेषः** सूपकारैः ज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्राविशत्। तेन अश्वशालायाम् अपि अग्निज्वालाः समुत्थिताः। अतः केचित् अश्वाः दग्धाः केचित् च (vi) **मृताः** । राजवैद्यः नृपम् अवदत् यत् अश्वानां वह्निदाहसमुद्भवः दोषः (vii) **वानराणाम्** मेदसा नाशमभ्येति। राजा आदिशत्- यथोचितं क्रियताम्। राजादेशं श्रुत्वा भयत्रस्ताः (viii) **वानराः** अचिन्तयन्- अवधीरिताः अस्माभिः गुरुजनोपदेशाः।	½×8=4

----------0000----------